**0975 – अभ्यासवान् भव**
कक्षा 9 के लिए पाठ्यपुस्तक

**ISBN 978-93-5292-059-4**

***प्रथम संस्करण***
*मई 2018 वैशाख 1940*

***पुनर्मुद्रण***
*अप्रैल 2019 चैत्र 1941*
*अक्तूबर 2019 अश्विन 1941*
*फ़रवरी 2021 माघ 1942*

**PD ?? RPS**

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2018***

**₹ .....**

*एन.सी.ई.आर.टी. वाटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

*प्रकाशन प्रभाग में सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नयी दिल्ली 110 016 द्वारा प्रकाशित तथा ........................ ...................................................................... ...................................................................... ......................................................द्वारा मुद्रित।*

**सर्वाधिकार सुरक्षित**

- ❑ प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलेक्ट्रॉनिकी, मशीनी, फोटोप्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुन: प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।
- ❑ इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- ❑ इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**एन सी ई आर टी के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नयी दिल्ली 110 016** फ़ोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III स्टेज
**बेंगलुरु 560 085** फ़ोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फ़ोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट: धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फ़ोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लैक्स
मालीगाँव
**गुवाहाटी 781 021** फ़ोन : 0361-2674869

**प्रकाशन सहयोग**

| | |
|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : *अनूप कुमार राजपूत* |
| मुख्य संपादक | : *श्वेता उप्पल* |
| मुख्य उत्पादन अधिकारी | : *अरुण चितकारा* |
| मुख्य व्यापार प्रबंधक (प्रभारी) | : *विपिन दिवान* |
| संपादन सहायक | : ऋषिपाल सिंह |
| उत्पादन सहायक | : .............. |

**चित्र**
यश्वन्त के. श्रीवास्तव

© NCERT not to be republished

# पुरोवाक्

भारतस्य शिक्षाव्यवस्थायां संस्कृतस्य महत्त्वमुद्दिश्य विद्यालयेषु संस्कृत-शिक्षणार्थम् आदर्श-पाठ्यक्रम-पाठ्यपुस्तकादिसामग्रीविकासक्रमे राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः भाषाशिक्षाविभागेन षष्ठवर्गादारभ्य द्वादशकक्षापर्यन्तं राष्ट्रियपाठ्यचर्यानुरूपं संस्कृतस्य आदर्शपाठ्यक्रमं निर्माय पाठ्यपुस्तकानि निर्मीयन्ते। अस्मिन्नेव क्रमे माध्यमिकस्तरीयच्छात्राणां संस्कृतव्याकरणस्य अभ्यासार्थं द्वादशाध्यायेषु निर्मितस्य *अभ्यासवान् भव* इति नामधेयस्य अभ्यासपुस्तकस्य संस्करणं प्रस्तूयते। अत्र अपठितावबोधनेन सह पत्रलेखनम्, अनुच्छेदलेखनम्, रचनानुवादः, वर्णविचारः, कारकोपपदविभक्तिः, प्रत्ययसमासाव्ययप्रयोगाः, शब्दरूपाणि, धातुरूपाणि इति विषयेषु अभ्यासक्रमाः दत्ताः येन छात्रेषु संस्कृतभाषाकौशलानां विकासो भवेत्। अनेन पुस्तकेन सह छात्राः संस्कृतस्य भाषाप्रयोगे दक्षाः भवेयुः इति एतदर्थमपि पुस्तकेऽस्मिन् प्रयत्नो विहितः।

पुस्तकस्यास्य प्रणयने आयोजितासु कार्यगोष्ठीषु आगत्य यैः विशेषज्ञैः अनुभविभिः संस्कृताध्यापकैश्च परामर्शादिकं दत्त्वा सहयोगः कृतः, तान् प्रति परिषदियं स्वकृतज्ञतां प्रकटयति। पुस्तकमिदं छात्राणां कृते उपयुक्ततरं विधातुम् अनुभविनां विदुषां संस्कृत-शिक्षकाणां च सत्परामर्शाः सदैवास्माकं स्वागतार्हाः।

नवदेहली
*मई, 2018*

हृषीकेशः सेनापतिः
*निदेशकः*
राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

© NCERT not to be republished

© NCERT
not to be republished

# पुस्तक निर्माण समिति

**सदस्य**

आभा झा, *पी.जी.टी.* संस्कृत, गार्गी सर्वोदय कन्या विद्यालय, ग्रीन पार्क, नयी दिल्ली

कीर्ति कपूर, *प्रोफ़ेसर*, भाषा शिक्षा विभाग, एन.सी.ई.आर.टी., नयी दिल्ली

जगदीश सेमवाल, *सेवानिवृत्त निदेशक*, वैदिक शोध संस्थान, होशियारपुर

भास्करानन्द पाण्डेय, *सेवानिवृत्त प्रधानाचार्य,* राजकीय सर्वोदय सह-शिक्षा विद्यालय, पश्चिम विहार नयी दिल्ली

लता अरोड़ा, *सेवानिवृत्त टी.जी.टी.* संस्कृत, केंद्रीय विद्यालय नं. 3, दिल्ली कैण्ट, नयी दिल्ली

विरेन्द्र कुमार, *टी.जी.टी.* संस्कृत, केंद्रीय विद्यालय नं. 9, फ़रीदाबाद

शंकर झा *टी.जी.टी.* संस्कृत, केंद्रीय विद्यालय नं. 2, फ़रीदाबाद

सरोज गुलाटी, *पी.जी.टी.* संस्कृत, कुलाची हंसराज मॉडल पब्लिक स्कूल, अशोक विहार, दिल्ली

सरोज पुरी, *टी.जी.टी.* संस्कृत, डी.ए.वी. पब्लिक स्कूल, पीतमपुरा, दिल्ली

**समन्वयक एवं संपादक**

के.सी.त्रिपाठी, *प्रोफ़ेसर* संस्कृत, भाषा शिक्षा विभाग, एन.सी.ई.आर.टी., नयी दिल्ली।

**सहसमन्वयक एवं संपादक**

जतीन्द्र मोहन मिश्र, *प्रोफ़ेसर*, भाषा शिक्षा विभाग, एन.सी.ई.आर.टी., नयी दिल्ली

© NCERT not to be republished

# आभार

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, पुस्तक निर्माण समिति के सभी सदस्यों के प्रति हार्दिक आभार व्यक्त करती है। परिषद्, जगदीश चन्द्र काला एवं यासमीन अशरफ, *जे.पी.एफ.* संस्कृत (भाषा शिक्षा विभाग) एवं संपादन के लिए ममता गौड़ *संपादक-संविदा*, आरती, नरेश कुमार *डी.टी.पी. ऑपरेटर* (प्रकाशन प्रभाग) के प्रति भी हार्दिक आभार व्यक्त करती है, जिन्होंने पाण्डुलिपि के प्रूफ़ संशोधन में विशेष सहयोग किया है। पुस्तक को यथासमय प्रकाशित करने के लिए परिषद् प्रकाशन प्रभाग के प्रति भी आभार व्यक्त करती है।

© NCERT
not to be republished

# भूमिका

व्याकरणशास्त्र अनादिकाल से भारतीय चिन्तन का अनिवार्य अङ्ग रहा है। वैदिक काल से लेकर आधुनिक काल तक संस्कृत भाषा में लिखित शास्त्रों के सम्यक् अध्ययन, मनन एवं चिन्तन के लिए व्याकरण का ज्ञान आवश्यक है, क्योंकि व्याकरण भाषा को शुद्ध बनाकर उसका समुचित प्रयोग सिखाता है। व्याकरण शब्द (वि + आ + कृ + ल्युट्) से निष्पन्न है।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा: अनेन इति व्याकरणम्

अर्थात् शब्दों की व्युत्पत्ति करने वाले, प्रकृति एवं प्रत्यय का निर्धारण करने वाले तथा उनके शुद्ध स्वरूप का विवेचन करने वाले शास्त्र को व्याकरणशास्त्र कहते हैं। अति प्रचीन काल से शास्त्रों में व्याकरण का प्रमुख स्थान है – मुखं व्याकरणं स्मृतम्। संस्कृत भाषा में व्याकरणशास्त्र का जितना सूक्ष्म, तर्कपूर्ण एवं विस्तृत विवेचन हुआ है उतना विश्व की किसी अन्य भाषा में नहीं हुआ है। वेदों के सम्यक् अध्ययन, अर्थ-बोध तथा वेद-मंत्रों की व्याख्या के लिए वेदाङ्गों का ज्ञान अनिवार्य है। वेदाङ्ग 6 हैं —

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिण:।।

1. शिक्षा, 2. व्याकरण, 3. छन्द, 4. निरुक्त, 5. ज्योतिष, और 6. कल्प।

व्याकरण की सहायता से ही हम वेद, ब्राह्मण, आरण्यक, उपनिषद्, पुराण, रामायण, महाभारत आदि ग्रन्थों के साथ-साथ भास, कालिदास, माघ, श्रीहर्ष, भवभूति, बाण एवं जगन्नाथ प्रभृति विद्वानों की कृतियों का रसास्वादन करते हैं।

व्याकरण ऐसी शक्ति प्रदान करता है जिसके द्वारा सारे श्रुत और अश्रुत शब्दों तथा पठित और अपठित वाङ्मय का रहस्य अल्पकाल में ही समझा जा सकता है। शब्दों का असन्दिग्ध ज्ञान व्याकरण से ही सम्भव है। धनवान् शब्द शुद्ध है या धनमान्, बुद्धिमती शब्द शुद्ध है या बुद्धिवती। इस प्रकार के सन्देह को वैयाकरण ही दूर कर सकता है।

## संस्कृत व्याकरण की परम्परा

संस्कृत व्याकरण की परम्परा उतनी ही प्राचीन है जितनी वैदिक संहिता। तैत्तिरीय संहिता में उल्लेख है कि इन्द्र ने संस्कृत भाषा का प्रथम व्याकरण रचा। पतञ्जलि के महाभाष्य में संकेत मिलता है कि इन्द्र के पहले भी व्याकरणशास्त्र का अस्तित्व था। इन्द्र ने बृहस्पति से व्याकरण-विद्या का अध्ययन किया था—

"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच।"

ऐन्द्र व्याकरण की अविच्छिन्न परम्परा का उल्लेख ऋक्तन्त्र में भी सुलभ है —
ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्य:, ऋषय: ब्राह्मणेभ्यश्च।

Rationalised 2023-24

इससे प्रतीत होता है कि ऐन्द्र सम्प्रदाय व्याकरण का एक प्रसिद्ध सम्प्रदाय था। इसके समकक्ष व्याकरणशास्त्र का एक दूसरा माहेश्वर-सम्प्रदाय भी था जिसके प्रवर्तक महेश्वर थे जिसकी आधारशिला पर पाणिनि ने व्याकरण के भव्य प्रासाद का निर्माण किया।

*पाणिनि* ने *अष्टाध्यायी* में आपिशलि, काशकृत्स्न, शाकल्य, स्फोटायन एवं शाकटायन आदि दस वैयाकरणों का नामोल्लेख किया है। इन्होंने अपने से पूर्ववर्ती सभी वैयाकरणों के ग्राह्य-विचारों और विवेचनों से परिपूर्ण-तत्त्वों को अपने ग्रन्थ में अपनाया है।

पाणिनि परम्परा के द्वितीय वैयाकरण *कात्यायन* हैं, जिन्हें *वररुचि* भी कहा जाता है। ये दाक्षिणात्य थे। इन्होंने पाणिनि द्वारा रचित लगभग 1250 सूत्रों पर आलोचनात्मक टिप्पणी दी है, जो *वार्तिक* के नाम से प्रसिद्ध हैं। वार्तिकों की संख्या प्राय: चार हज़ार है।

पाणिनि की व्याकरण परम्परा का परिवर्तन एवं परिवर्धन करने वाले महान् वैयाकरण पतञ्जलि हैं। इनका समय दूसरी शताब्दी ई.पू. है। इनका प्रसिद्ध ग्रन्थ *महाभाष्य* है।

व्याकरणशास्त्र में पाणिनि, कात्यायन और पतञ्जलि को *त्रिमुनि* (मुनित्रय) संज्ञा से अभिहित किया गया है।

## प्रक्रिया ग्रन्थ

टीकाओं और उपटीकाओं के बाद पाणिनीय सूत्रों की नवीन पद्धति की ओर वैयाकरणों का ध्यान आकर्षित हुआ। *धर्मकीर्ति ने रूपावतार* ग्रन्थ लिखा, जिसमें अष्टाध्यायी के सूत्रों को विभिन्न प्रकरणों में विभक्त कर सम्पादित किया गया है। सन् 1350 ई. में विमल सरस्वती ने *रूपमाला* और 1400 ई. में पं. रामचन्द्र ने *प्रक्रिया कौमुदी* नामक ग्रन्थ की रचना की। 1630 ई. के लगभग *भट्टोजिदीक्षित* ने वैयाकरण *सिद्धान्त कौमुदी* की रचना की। इस पर स्वयं *भट्टोजिदीक्षित* ने *प्रौढ़मनोरमा* नाम की टीका लिखी। सिद्धान्त कौमुदी पर नागेशभट्ट ने *लघुशब्देन्दुशेखर* नामक प्रौढ़ ग्रन्थ लिखा। सिद्धान्त कौमुदी की दो अन्य प्रसिद्ध टीकाएँ – *तत्त्वबोधिनी* और *बालमनोरमा* हैं। आचार्य वरदराज ने सिद्धान्तकौमुदी को संक्षिप्त करते हुए *सारसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी* एवं *मध्यसिद्धान्तकौमुदी* की रचना की, जो व्याकरण के प्रारम्भिक छात्रों द्वारा क्रमश: व्याकरण अध्ययन के लिए अत्यन्त उपयोगी ग्रन्थ हैं।

उपर्युक्त समस्त ग्रन्थ प्राय: व्याकरण के व्युत्पत्ति पक्ष को लक्ष्य में रखकर लिखे गए हैं। व्याकरण के दार्शनिक पक्ष को लेकर लिखे गए ग्रन्थों में – भर्तृहरि का *वाक्यपदीय,* कौण्डभट्ट का *वैयाकरणभूषणसार* तथा नागेशभट्ट की *लघुमञ्जूषा* और *स्फोटवाद* प्रमुख रूप से उल्लेखनीय हैं।


विद्यालयी शिक्षा की रूपरेखा के आलोक में माध्यमिक स्तर के लिए निर्धारित संस्कृत पाठ्यक्रम को ध्यान में रखकर कक्षा नवीं के छात्रों के लिए संस्कृत भाषा के सम्यक् अभ्यास हेतु इस अभ्यास पुस्तक की रचना की गई है। इसमें 12 अध्याय हैं। प्रथम अध्याय में *अपठितावबोधनम्,* द्वितीय में *पत्रम् — (क) अनौपचारिकम् पत्रम्, (ख) औपचारिकम् पत्रम्,* तृतीय में *चित्रवर्णनम्,* चतुर्थ में *संवादानुच्छेदलेखनम्,* पंचम में *रचनानुवाद:,* षष्ठ में *कारकोपपदविभक्ति:,* सप्तम में *सन्धि:,* अष्टम में *उपसर्गाव्ययप्रत्यया:,* नवम में *समासा:,* दशम में *शब्दरूपाणि अकारान्त पुँल्लिङ्गशब्द:,* एकादश अध्याय में *धातुरूपाणि*

© NCERT not to be republished

एवं द्वादश अध्याय में *वर्णविचार:* दिए गए हैं। पुस्तक के परिशिष्ट 1 में '*फलादीनां नामानि*' तथा परिशिष्ट 2 में '*विलोमपदानि*' एवं '*पर्यायपदानि*' को दिया गया है। इस तरह इस पुस्तक में कक्षा नवम के लिए निर्धारित पाठ्यक्रम के अनुरूप संस्कृत व्याकरण के आधारभूत नियमों का परिचय देते हुए उपयोगी अभ्यासचारिका द्वारा छात्रों में संस्कृत की समझ तथा भाषा प्रयोग को सुदृढ़ करने का प्रयत्न किया गया है।

आशा है यह अभ्यास पुस्तक माध्यमिक स्तर पर नवम कक्षा के छात्रों को संस्कृत भाषा, व्याकरण एवं संस्कृत व्यवहार का अभ्यास कराने में सफल होगी।

© NCERT not to be republished




© not to be republished

# विषयानुक्रमणिका


| | | |
|---|---|---|
| *पुरोवाक्* | | *iii* |
| *भूमिका* | | *vii* |
| *मङ्गलम्* | | *xii* |
| 1. | अपठितावबोधनम् | 1 |
| 2. | पत्रम् | 13 |
| | (क) अनौपचारिकम् पत्रम् | |
| | (ख) औपचारिकम् पत्रम् | |
| 3. | चित्रवर्णनम् | 24 |
| 4. | संवादानुच्छेदलेखनम् | 34 |
| 5. | रचनानुवाद: | 46 |
| 6. | कारकोपपदविभक्ति: | 59 |
| 7. | सन्धि: | 86 |
| 8. | उपसर्गाव्ययप्रत्यया: | 92 |
| 9. | समासा: | 109 |
| 10. | शब्दरूपाणि | 113 |
| 11. | धातुरूपाणि | 134 |
| 12. | वर्णविचार: | 138 |
| | परिशिष्टम्–1 | 142 |
| | परिशिष्टम्–2 | 146 |


© NCERT not to be republished

# मङ्गलम्

**अभ्यासं कार्यसिद्ध्यर्थं**
**नित्यं कुर्वन्ति पण्डिता:।**
**संसारे सिद्धिमन्त्रोऽयं**
**तस्मादभ्यासवान्भव।।**

कार्य की सिद्धि के लिए समझदार लोग नित्य अभ्यास करते हैं। यह (अभ्यास) संसार में सिद्धि (प्राप्त करने) का मंत्र है। इसलिए (तुम भी) अभ्यास करने वाले बनो।

**अभ्यस्यामो वयं विद्यां**
**यावतीमधिकाधिकाम्।**
**तावदग्रे जगत्यस्मिन्**
**सरिष्यामो न संशय:।।**

हम विद्या का जितना अधिक से अधिक अभ्यास करते हैं, संसार में उतना ही आगे बढ़ेंगे इसमें संदेह नहीं है।

© NCERT not to be republished

0975CH01

# 1

# अपठितावबोधनम्

**I. अधोलिखित-परिच्छेदं पठित्वा अभ्यासप्रश्नानाम् उत्तरं लिखत।**

गोदावरीतीरे विशाल: शाल्मलीतरु: आसीत्। तत्र पक्षिण: निवसन्ति स्म। अथ कदाचित् रात्रौ कश्चिद् व्याध: तत्र तण्डुलान् विकीर्य जालं च विस्तीर्य प्रच्छन्नो भूत्वा स्थितश्च। प्रात:काले चित्रग्रीवनामा कपोतराज: सपरिवार: आकाशादेव तान् तण्डुलकणान् अपश्यत्। तत: कपोतराज: तण्डुललुब्धान् कपोतान् प्रत्याह— "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भव:। भद्रमिदं न पश्यामि। संभवत: कोऽपि व्याध: अत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।" परं तस्य वचनं तिरस्कृत्य कश्चित् तरुण: कपोत: सदर्पमाह– आ:! किमेवमुच्यते—

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ।।**

एतदाकर्ण्य सर्वे कपोता: तत्र उपविष्टा: जाले च निबद्धा: अभवन्। यतो हि– बहुश्रुता अपि लोभमोहिता: क्लिश्यन्ते।

**अभ्यास:**

**(1) एकपदेन उत्तरत –**

(क) आपत्काले केषां वचनं ग्राह्यम्? ....................

(ख) विशाल: शाल्मलीतरु: कुत्रासीत्? ....................

(ग) व्याध: कान् विकीर्य प्रच्छन्नो भूत्वा स्थित:? ....................

(घ) सर्वथा कीदृशं कर्म न कर्तव्यम्? ....................

**(2) पूर्णवाक्येन उत्तरत –**

(क) कपोतराज: कान् प्रत्याह?

..........................................................................

(ख) के कदा क्लिश्यन्ते?

..........................................................................

**(3) भाषिककार्यम् –**

(क) 'विशाल: शाल्मलीतरु: आसीत्।' अत्र विशेषणपदं किम्?

..........................................................................

© NCERT not to be republished

(ख) 'तरुण: कपोत: सदर्पम् आह' इति वाक्ये क्रियापदं चित्वा लिखत।

..........................................................................................

(ग) 'तत्र रात्रौ पक्षिण: निवसन्ति स्म', इति वाक्ये कर्तृपदं चित्वा लिखत।

..........................................................................................

(घ) 'वृद्ध:' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

..........................................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..........................................................................................

II. समय: अन्येषां वस्तूनाम् अपेक्षया अधिक: महत्त्वपूर्ण: मूल्यवान् च वर्तते। अन्यानि वस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते परं समयो विनष्टो न केनापि उपायेन पुन: परावर्तयितुं शक्यते।

जना: द्विधा समयस्य दुरुपयोगं कुर्वन्ति– व्यर्थयापनेन अकार्यकरणेन च। अनेके जना: कार्यसम्पादने समर्था: अपि निरर्थकं समयं यापयन्ति। इतस्तत: भ्रमन्ति, अप्रयोजनं गृहे-गृहे अटन्ति। ते तु नैव स्वार्थाय न च परार्थाय किञ्चित् कार्यं कुर्वन्ति। न धर्मम् आचरन्ति, न धनम् उपार्जयन्ति, तेषां जन्म निरर्थकं भवति। भूमिरपि एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति। ईदृशा: जना: कस्मै अपि न रोचन्ते न वा कश्चित् तेभ्य: आश्रयमेव दातुमिच्छति। ते यत्र-यत्र गच्छन्ति तत: एव बहिष्क्रियन्ते। पितरौ अपि एतादृशान् तनयान् न अभिनन्दत:।

अत: अस्माभि: आलस्यं विहाय सर्वदैव समयस्य सदुपयोग: कर्तव्य:।

© NCERT not to be republished

## अभ्यास:

**(1) एकपदेन उत्तरत —**

(क) पितरौ एतादृशान् कान् नाभिनन्दत:? ..........................

(ख) क: विनष्ट: परावर्तयितुं न शक्यते? ..........................

(ग) का निष्क्रियाणां भारं वोढुं नेच्छति? ..........................

(घ) किं विहाय समयस्य सदुपयोग: कर्तव्य:? ..........................

**(2) पूर्णवाक्येन उत्तरत —**

(क) केषां जन्म निरर्थकं भवति?

..........................................................................................

(ख) अन्येषां वस्तूनामपेक्षया समय: किमर्थमधिक: महत्त्वपूर्ण: मूल्यवान् च?

..........................................................................................

**(3) भाषिक-कार्यम् —**

(क) 'यावान् काल: निरर्थक: गत: स: गत: एव' इति वाक्ये अव्ययपदं किम् इति चित्वा लिखत।

.......................................................................................................

(ख) 'सदुपयोग:' इत्यस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

.......................................................................................................

(ग) 'अनेके जना:' इत्यत्र विशेष्यपदं किम्?

.......................................................................................................

(घ) 'पुत्रान्' इत्यस्य कृते गद्यांशे किं पदं प्रयुक्तम्?

.......................................................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

.......................................................................................................

III. जयदेव: वेदशास्त्रज्ञ: सदाचारी वयोवृद्ध: च आसीत्। तस्य पुत्र: धनेश: विद्वान् पितृभक्तश्चासीत्। स: पितु: सकाशादेव वेदशास्त्राणाम् अध्ययनं करोति स्म। श्रद्धया च तं सेवते।

धनेश: सर्वदा अव्यवधानेन पित्रो: वचनं पालयति स्म। पित्रो: सेवायाम् अध्ययने चैव तस्य समय: गच्छति स्म। तस्य सेवया पितरौ सर्वदा स्वस्थौ प्रसन्नौ चास्ताम्। एतत्सर्वं दृष्ट्वा एकदा नगेन्द्र: नाम शिष्य: धनेशमपृच्छत्- हे धनेश! किं जीवनपर्यन्तम् एवमेव पितृसेवाया: कार्यं करिष्यसि? त्वं जीवनस्य किम् उद्देश्यम् मन्यसे? प्रश्नौ निशम्य धनेश: साश्चर्यम् उदतरत्- भो: मित्र! किं त्वं 'पित्रो: सेवया एव विज्ञानम्' इति सूत्रं न श्रुतवान्। अहं तयो: सेवया एव आत्मानं गौरवान्वितम् अनुभवामि।

कालक्रमेण धनेश: लोकविश्रुत: विद्वान् अभवत्।

**अभ्यास:**

**(1) एकपदेन उत्तरत —**

(क) धनेश: कयो: सेवायां समयं यापयति स्म? ..............................

(ख) क: विद्वान् पितृभक्तश्चासीत्? ..............................

(ग) क: धनेशं जीवनस्य अभिप्रायम् अपृच्छत्? ..............................

(घ) आचार्यस्य नाम किम् आसीत्? ..............................



© NCERT not to be republished
Rationalised 2023-24

**(2) पूर्णवाक्येन उत्तरत —**

(क) धनेशस्य समय: कथं गच्छति स्म?

..................................................................................................

(ख) नगेन्द्रस्य प्रश्नौ निशम्य धनेश: साश्चर्यम् किम् उदतरत्?

..................................................................................................

**(3) यथानिर्देशम् उत्तरत —**

(क) 'तस्य पुत्र: धनेश:' इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

..................................................................................................

(ख) 'श्रुत्वा' इति पदस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

..................................................................................................

(ग) 'पितरौ सर्वदा स्वस्थौ प्रसन्नौ चास्ताम्' अत्र क्रियापदं चित्वा लिखत।

..................................................................................................

(घ) 'मातु:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

..................................................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..................................................................................................

IV. अमर्त्यसेन: इति नाम एव संस्कृतमयम्। अस्य जन्म शान्तिनिकेतने अभवत्। शान्तिनिकेतनस्य संस्थापक: गुरुदेव: रवीन्द्रनाथठाकुर: अस्य नामकरणं कृतवान्। बालकस्य नामकरणं कुर्वन् स: उक्तवान् आसीत्- 'अमर्त्यसेन:' इत्येतत् पदं संस्कृत-मूलम्। शान्तिनिकेतने वसन् अमर्त्यसेन: संस्कृताभ्यासं कृतवान्। स: 'स्वपितामह: श्रीक्षितीशमोहनसेन इव संस्कृतस्य प्रसिद्ध: विद्वान् भवेयम्' इति इच्छति स्म। उच्च-शिक्षाप्राप्त्यर्थं स आंग्लदेशम् अगच्छत् तत्र 'अर्थशास्त्रस्य' विशदम् अध्ययनं कृत्वा प्राध्यापक: अभवत्। अध्यापन-समये स: अर्थशास्त्रविषयिणीं महतीं गवेषणाम् अकरोत्। अध्यापन-कार्यं समाप्य श्रीअमर्त्यसेन: भारतं प्रत्यावर्तत। भारत–सर्वकार: तस्य वैदुष्यं विद्वत्तां च समादृत्य तस्मै 'भारतरत्नम्' इति सम्मानं दत्तवान्। जयतु एष: संस्कृतपुत्र:, अर्थशास्त्री च।

**अभ्यास:**

**(1) एकपदेन उत्तरत —**

(क) अमर्त्यसेनस्य जन्म कुत्र अभवत्? ..........................................

(ख) अमर्त्यसेनाय 'भारतरत्नम्' इति सम्मानं क: दत्तवान्? ..........................................



© NCERT not to be republished

(ग) अमर्त्यसेन: उच्चशिक्षार्थं कुत्र अगच्छत्? ..........................................

(घ) अमर्त्यसेन: कुत्र संस्कृताभ्यासं कृतवान्? ..........................................

**(2) पूर्णवाक्येन उत्तरत —**

(क) अमर्त्यसेनस्य नामविषये रवीन्द्रनाथ: ठाकुर: किम् उक्तवान्?

..........................................................................................

(ख) अध्यापनसमये स: किं कृतवान्?

..........................................................................................

**(3) यथानिर्देशम् उत्तरत —**

(क) 'अस्य जन्म शान्तिनिकेतने अभवत्।' इत्यस्मिन् वाक्ये 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

..........................................................................................

(ख) 'अमर्त्यसेन: संस्कृताभ्यासं कृतवान्।' गद्यांशेऽस्मिन् कर्तृपदं चित्वा लिखत।

..........................................................................................

(ग) 'अगच्छत्' इति क्रियापदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

..........................................................................................

(घ) 'महतीं गवेषणाम्' अत्र विशेषणपदं किम्?

..........................................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..........................................................................................

V. विगतसप्ताहे अस्माकं विद्यालयपक्षत: शैक्षणिकयात्राप्रसङ्गे वयम् उज्जयिनीं प्रति अगच्छाम। उज्जयिनी भारतस्य इतिहास-धर्म-दर्शन-कला-साहित्य-योग-ज्योतिषादीनां केन्द्रम् अस्ति। अत्र स्थितस्य महाकालेश्वरस्य कारणेनापि अस्या: विशिष्टं महत्त्वम्। एषा अवन्तिका, विशाला, प्रतिकल्पा, कुमुदवती, स्वर्णशृंगा इति नामभिरपि शास्त्रेषु वर्णिता।

अत्रत्या वेधशालाऽपि अतिविशिष्टा। जना: वेधशालां 'यन्त्रभवनम्' इत्यपि वदन्ति। इयम् आंग्लभाषायाम् 'आब्ज़र्वेटरी' इत्यपि कथ्यते। शैक्षणिकयात्राप्रसंगात् अस्या: विशिष्टावलोकनम् अस्माभि: कृतम्। एषा वेधशाला उज्जयिन्या: दक्षिणभागे क्षिप्राया: उत्तरतटे उन्नतभूभागे स्थिताऽस्ति। कर्करेखा इत: एव निर्गता। इदं स्थानं गणितस्यापि आधारस्थलम्।



© NCERT not to be republished

अष्टादशशताब्द्यां राज्ञा जयसिंहेन ज्योतिषानुरागवशात् वेधशालाया: निर्माणं कारितम्। ग्रहाणां प्रत्यक्षवेधनाय जयसिंह: उज्जयिन्याम् काश्याम् देहल्याम् जयपुरे मथुरायां च वेधशालानां निर्माणम् अकारयत्।

वस्तुत: वेधशालां वीक्ष्य मनसि गौरवमनुभवामि यत् प्राचीनकालेऽपि अस्माकं पूर्वजानां गणितस्य ग्रहनक्षत्राणाञ्च ज्ञानम् अद्भुतं वैज्ञानिकञ्चासीत्।

## अभ्यास:

**(1) एकपदेन उत्तरत —**

(क) वेधशाला कस्या: उत्तरतटे स्थिता अस्ति? ..............................

(ख) विद्यालयपक्षत: वयं कुत्र अगच्छाम? ..............................

(ग) वेधशालाया: एकम् अपरं नाम लिखत? ..............................

(घ) वेधशाला कस्य आधारस्थलम्? ..............................

**(2) पूर्णवाक्येन उत्तरत —**

(क) जयसिंह: कुत्र-कुत्र वेधशालानां निर्माणम् अकारयत्?

..............................

(ख) उज्जयिनी केषां केन्द्रम् वर्तते?

..............................

**(3) यथानिर्देशम् उत्तरत —**

(क) 'दृष्ट्वा' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

..............................

(ख) 'उत्तरभागे' इति पदस्य विपरीतार्थपदम् अनुच्छेदात् चित्वा लिखत।

..............................

(ग) 'शैक्षणिकयात्राप्रसङ्गात् अस्या: विशिष्टावलोकनम् अस्माभि: कृतम्' - अत्र 'अस्या:' इति सर्वनामपदं कस्यै प्रयुक्तम्?

..............................

(घ) 'अस्माकं पूर्वजानां ज्ञानम् अद्भुतं वैज्ञानिकञ्चासीत्' इत्यस्मिन् वाक्ये विशेष्यपदं किम्?

..............................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..............................

© NCERT not to be republished

VI. पञ्चदश-शताब्द्यां निर्मितं 'लोधी गार्डन' इति प्रसिद्धम् उपवनं नवदेहलीक्षेत्रे स्थितमस्ति। नवति-पहल - परिमितं (90 ACRE) बृहदाकारकम् इदमुपवनम्। अत्र शताधिक-वर्षेभ्य: प्राचीना:पादपा: सन्ति। तेषु वटवृक्ष: अश्वत्थ: निम्ब: किंशुक: आम्रं देवदारु: इंगुदी: सिंसपा: आमलकवृक्ष: बिल्व: अर्जुन: च प्रमुखा: सन्ति। सरणिषु स्थिता: वृक्षा: दर्शकानां मनांसि हरन्ति।

प्रतिदिनं सहस्रश: जना: अत्र विहाराय आगच्छन्ति। लक्षश: खगाश्च अत्राश्रयं प्राप्नुवन्ति। इदम् उपवनम् चतुर्भागेषु विभक्तम्। एकत्र पुष्पाराम: विराजते। अस्मिन् आरामे मुख्यतया पाटलं नवमल्लिका उत्पलं जपाकुसुमं शेफालिका बकुलपुष्पं रजनीगन्धा यूथिका च सन्ति।

पुष्पाणां शोभा दर्शकानां मन: प्रसादयति। मधुगन्धिन: भ्रमरा: पुष्पेषु डयन्ते। पुष्पेभ्य: मधुररसं नीत्वा मधुमक्षिका: मधुसञ्चयं कुर्वन्ति। अस्मिन् उपवने विद्युन्निर्झरा: वातावरणं मनोहरम् शीतलञ्च कुर्वन्ति। अत्र भ्रान्त्वा रुग्णा: अपि जना: स्वास्थ्यलाभं कुर्वन्ति। कदाचिदस्माभि: अत्र भ्रमणाय गन्तव्यमेव।

## अभ्यास:

**(1) एकपदेन उत्तरत –**

(क) 'लोधीगार्डन' इति उपवनम् कति-भागेषु विभक्तम्? ..........

(ख) भ्रमरा: कुत्र डयन्ते? ..........

(ग) रुग्णा: जना: किं कृत्वा स्वास्थ्यलाभं कुर्वन्ति? ..........

(घ) केषां शोभा दर्शकानां मन: प्रसादयति? ..........

**(2) पूर्णवाक्येन उत्तरत –**

(क) ‘लोधी-गार्डन’ इति नामके उपवने के प्रमुखा: वृक्षा: सन्ति?

..........

(ख) पुष्पारामे उपलब्धानां केषाञ्चित् पुष्पाणां नामानि लिखत।

..........

**(3) यथानिर्देशम् उत्तरत –**

(क) गद्यांशात् संख्यावाचकमेकं पदं चित्वा लिखत।

..........

(ख) ‘मधुगन्धिन: भ्रमरा:’ अत्र किं विशेषणपदं प्रयुक्तम्?

..........



Rationalised 2023-24

(ग) 'स्वस्था:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

..............................................................................

(घ) 'सहस्रश: जना: भ्रमणाय आगच्छन्ति' अत्र कर्तृपदं किम्।

..............................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..............................................................................

VII. "अम्ब! अहमपि अनुजेन देवेशेन सह क्रीडितुं बहिर्गच्छामि, द्वारं पिधेहि कृपया।" पुत्र्या: इदं वच: निशम्य रमा स्वशैशवं प्राप्ता विचारमग्ना चाभवत्-यदा ममानुज: क्रीडनाय बहिर्गच्छति स्म तदा अहं स्वपितृभ्यां गृहकार्यार्थं पठनार्थं चैव प्रेरिता येनाऽहं गृहस्योत्तरदायित्वनिर्वाहे शिक्षाक्षेत्रे च श्रेष्ठाऽभवम्। परमद्यापि एका कुण्ठा मनसि यदा-कदा जायते यदहं पाठ्यसहगामिक्रियासु क्रीडासु वा कदापि उत्तमं प्रदर्शनं कर्तुं समर्था नाऽभवम्। अद्य मत्सदृश्य: नार्य: वायुयानं चालयन्ति ता: शिक्षिका: चिकित्सिका: अधिकारिण्य: प्रशासिका: वा भूत्वा गृहस्योत्तरदायित्वमपि निर्वहन्ति। क: दोष: आसीन्मम यत् निपुणा सत्यपि अहमेतादृशं किमपि कर्तुं नापारयम्। अस्तु तावत्! चिन्तयाऽलम्। अहं पुत्र्यै तादृश्य: सर्वा: सुविधा: अवश्यमेव प्रदास्यामि येन तस्या: मनसि एतादृश्या: कुण्ठाया: अवकाश: एव न स्यात्।

**अभ्यास:**

**(1) एकपदेन उत्तरत—**

(क) रमा काभ्यां गृहकार्यार्थं पठनार्थं च प्रेरिता? ..............................

(ख) रमा कस्यै सर्वा: सुविधा: प्रदास्यति? ..............................

(ग) रमाया: पुत्री केन सह क्रीडितुं बहिर्गच्छति? ..............................

(घ) रमा कस्य निर्वाहे श्रेष्ठा अभवत्? ..............................

**(2) पूर्णवाक्येन उत्तरत—**

(क) पुत्र्या: किं वच: निशम्य रमा स्वशैशवं प्राप्ता?

..............................................................................

(ख) रमाया: मनसि यदा कदा कीदृशी कुण्ठा जायते?

..............................................................................

**(3) यथानिर्देशम् उत्तरत—**

(क) 'एतादृश्या: कुण्ठाया: अवकाश: एव न स्यात्' -अत्र किं विशेष्यपदम्?

..............................................................................



Rationalised 2023-24

(ख) 'मत्सदृश्य: नार्य:' वायुयानं चालयन्ति "इति वाक्ये किं कर्तृपदम्?

..........

(ग) 'द्वारं पिधेहि कृपया' अत्र किं क्रियापदम्?

..........

(घ) 'अस्तु तावत्' अनयो: पदयो: किम् अव्ययपदम्?

..........

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..........

VIII. नकुल: प्रतिदिनं प्रात: स्यूतकमादाय महाविद्यालयं गच्छति सायंकाले च कदा आगमिष्यति इति तु अनिश्चितम् एव। पितरौ एतत्सर्वं दृष्ट्वा आहतौ भवत:। पुत्रं बोधयितुञ्च प्रयत्नम् अकुरुताम् परं नकुल: किमपि न शृणोति। एकदा पुत्रं प्रबोधयन्ती माता रुदती वदति यत् धिङ् मम जीवितम्, यस्यां सूनुरपि अविश्वसिति, मनोगतं भावमेव न ज्ञापयति। मातु: एतादृशेन व्यवहारेण साश्रुनयन: पुत्र: वदति-मात:! अद्यत्वे मम मित्राणि मां मद्यपानाय प्रेरयन्ति। तै: सह अहमपि सानन्दं मद्यपानं धूमपानमपि च करोमि खाद्याखाद्यं च खादामि। बहुधा मित्राणि प्रति 'न' इति वक्तुमिच्छामि परमसमर्थ: एवात्मानं पश्यामि मित्रतावशात्। मात:! कर्तव्याकर्तव्यमपि विस्मृतं मया। दर्शय मां सन्मार्गम्। एवंभूतं पुत्रं स्नेहेन लालयन्ती माता तमबोधयत् यत्-'त्यज दुर्जनसंसर्गम्, समानशीलव्यसनेषु चैव सख्यं करणीयमिति'। मातु: वात्सल्यमयेन बोधनेन नकुल: दुर्जनसंसर्गं त्यक्तुं दृढनिश्चयं करोति।

**अभ्यास:**

**(1) एकपदेन उत्तरत –**

(क) 'धिङ् मम जीवितम्' इति का वदति? ..........

(ख) कौ आहतौ भवत:? ..........

(ग) माता पुत्रं किं त्यक्तुम् अकथयत्? ..........

(घ) नकुल: मित्राणि प्रति किं वक्तुमिच्छति स्म? ..........

**(2) पूर्णवाक्येन उत्तरत –**

(क) नकुल: मित्रै: सह किं किं करोति स्म?

..........

(ख) स्नेहेन लालयन्ती माता पुत्रं किं बोधयति?

..........



© NCERT not to be republished

**(3) यथानिर्देशम् उत्तरत —**

(क) 'अद्यत्वे मम मित्राणि मां मद्यपानाय प्रेरयन्ति'- अत्र किमव्ययपदम्?

..............................

(ख) 'साश्रुनयन: पुत्र: वदति' - अत्र किं विशेषणपदम्?

..............................

(ग) 'अनेकश:' इति पदस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

..............................

(घ) गद्यांशे 'शत्रून्' इति पदस्य किं विलोमपदं प्रयुक्तम्?

..............................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..............................

IX. एक: काष्ठहार: काष्ठान्यानेतुं वनमगच्छत्। तत्र सहसैव वृक्षध्वनिं श्रुत्वा तिष्ठति। वृक्ष: समीपस्थं कर्तितं वृक्षं दृष्ट्वा रुदन्निव वदति स्म, ह्य: एक: काष्ठहार: काष्ठाय मम मित्रस्य शरीरमच्छिनत्। छेदनेनास्य शरीरे व्रणान् दृष्ट्वातीव दु:खितोऽहम्। काष्ठानि नीत्वा स: तु आपणं गतवान् परं न कोऽप्यस्त्यत्र योऽस्य व्रणानामुपचारं करोतु। किमर्थं विस्मरन्ति जना: यदस्माकं शरीरं न केवलं काष्ठविक्रयणाय एवास्ति अपि तु वायो: शुद्धीकरणाय, कूहानाशनाय, आतपेन श्रान्तेभ्य: पथिकेभ्य:, पशुभ्यश्च छायाप्रदानाय, खगेभ्य: निवासाय, व्याधितेभ्य: औषधये, बुभुक्षितेभ्य: फलप्रदानाय चाप्यस्ति। काष्ठविक्रयेण तु केवलमेकवारमेव एकस्यैव लाभ: जायते परमनेन चिरकालपर्यन्तं विविधा: प्राणिन: निराश्रया: भवन्ति। फलौषधीनां प्राप्तिरपि दुर्लभा भवति। एवमेव एकैकं कृत्वाऽस्माकं सर्वेषां कर्तनेन वसन्तादीनाम् ऋतूनां महत्त्वमपि विलुप्तं भविष्यति। इदं सर्वं श्रुत्वा खिन्नमना: काष्ठहार: वृक्षकर्तनात् विरम्य वृक्षारोपणम् आरब्धवान्।

**अभ्यास:**

**(1) एकपदेन उत्तरत —**

(क) काष्ठहार: किं श्रुत्वा तिष्ठति? ..............................

(ख) वृक्षस्य वार्तां श्रुत्वा काष्ठहार: कीदृश: अभवत्? ..............................

(ग) काष्ठहार: काष्ठानि नीत्वा कुत्र गतवान्? ..............................

(घ) वृक्षा: कस्य शुद्धीकरणाय भवन्ति? ..............................



© NCERT not to be republished

**(2) पूर्णवाक्येन उत्तरत —**

(क) वृक्ष: किमर्थं दु:खित: आसीत्?

..............................................................................................................................

(ख) वृक्षाणां कर्तनेन केषां महत्त्वं विलुप्तं भविष्यति?

..............................................................................................................................

**(3) यथानिर्देशम् उत्तरत —**

(क) 'वृक्ष: समीपस्थं वृक्षं दृष्ट्वा रुदन्निव वदति'- अस्मिन् वाक्ये किं विशेषणपदम्?

..............................................................................................................................

(ख) 'आश्रिता:' इति पदस्य कृते किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

..............................................................................................................................

(ग) 'विलोक्य' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

..............................................................................................................................

(घ) 'ह्य: एक: काष्ठहार: मम मित्रस्य शरीरमच्छिनत्' - अत्र किम् अव्ययपदम्।

..............................................................................................................................

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..............................................................................................................................

X. विज्ञानस्य नवीनेषु आविष्कारेषु एक: अतीव उपयोगी आविष्कार: अस्ति- 'चलभाषियन्त्रम् (मोबाइल इति)। अस्य मुख्यं प्रयोजनमासीत् दूरवर्तिना केनापि जनेन सह वार्तालाप: सुकर: भवेत् इति। परमद्यत्वे तु चलभाषियन्त्रं लघुसङ्गणकमिव वर्तते। एवं प्रतीयते यत् जना: हस्ते एकं सम्पूर्णं जगत् एव नयन्त: गच्छन्ति। अनेन ते न केवलं सम्भाषणं कुर्वन्ति अपि तु वक्तारं साक्षात् पश्यन्त्यपि। ईमेल-फेसबुक-व्हाट्सएप-माध्यमै: एतदतीव सुकरं संदेशवाहकमपि।

अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव वाहनं प्राप्य जना: सरलतया स्वगन्तव्यं प्राप्नुवन्ति। न केवलमेतदेव अपि तु एतत् यन्त्रं मनोरञ्जनकारि अपि। बाला:, वृद्धा: युवान: अस्य माध्यमेन विविधक्रीडाभि: मनोरञ्जनक्षमा: भवन्ति। परमेतदपि विचारणीयं यदस्य अधिकाधिकप्रयोग: हानिकर: भवति। 'अति सर्वत्र वर्जयेत्' इत्यनुसृत्य अस्य यथावश्यकं प्रयोग: एव करणीय:।



© NCERT not to be republished

## अभ्यासः

**(1) एकपदेन उत्तरत —**

(क) किम् अतीव सुकरं सन्देशवाहकम्? ..........

(ख) जनाः साक्षात् कं पश्यन्ति? ..........

(ग) किं प्राप्य जनाः स्वगन्तव्यं प्राप्नुवन्ति? ..........

(घ) अस्य अधिकाधिकप्रयोगः कीदृशः भवति? ..........

**(2) पूर्णवाक्येन उत्तरत —**

(क) अस्य मुख्यं प्रयोजनं किमासीत्?

..........

(ख) अस्य प्रयोगेण के कथं च मनोरञ्जनक्षमाः भवन्ति?

..........

**(3) यथानिर्देशम् उत्तरत —**

(क) 'लब्ध्वा' इत्यर्थे किं पदं गद्यांशेऽस्मिन् प्रयुक्तम्?

..........

(ख) 'केनापि जनेन सह वार्तालापः सुकरः भवेत्' इत्यत्र किं विशेषणपदम्?

..........

(ग) 'अस्य यथावश्यकं प्रयोगः एव करणीयः' इति अत्र किं क्रियापदम्?

..........

(घ) 'चलभाषियन्त्रं लघुसङ्गणकमिव वर्तते' इति अत्र किम् अव्ययपदम्।

..........

**(4) उपर्युक्तगद्यांशस्य उचितं शीर्षकं दीयताम्।**

..........

© NCERT not to be republished

2

0975CH02

# पत्रम्

## (क) अनौपचारिकम् पत्रम्

**1. योगदिवसे आयोज्यमाने कार्यक्रमे अनुजस्य सहभागित्वं वर्णयत् पत्रम्।**

जयपुरम्
17.11.2017

प्रिय अनुज,
सस्नेहं नमो नम:।

कुशली, कुशलं कामये। इदं विज्ञाय मम चेत: अतीव प्रसन्नताम् अनुभवति यद् भवान् योगदिवसम् उपलक्ष्य राजधान्याम् आयोजिते विशेषकार्यक्रमे भारत प्रधानमन्त्रिणा सह योगासनानि करिष्यति। योगा: स्वास्थ्यस्य रक्षाया: सरलतमा: उपाया: सन्ति। सम्पूर्णविश्वं भारतीयस्य योगज्ञानस्य शिक्षणाय उत्सुकं दृश्यते। संयुक्तराष्ट्रसंघ: (U.N.O) जूनमासस्य एकविंशति-तारिकां 'योगदिवस:' इति रूपेण घोषितवान्।

अनुज! योगासनानि रक्तचापं, हृदयरोगम्, अतिस्थूलतां, मधुमेहं च निवारयति। त्वमपि प्रतिदिनम् अभ्यासं करोषि, अत: मन्ये तव स्वास्थ्यं सुदृढम् अस्ति एव। एवमेव उत्तरोत्तरम् उन्नतिं कुरु इति मे शुभकामना।

तव अग्रज:
रामकरण:
सी/104 वसन्तकुञ्जम:
जयपुरम्

© NCERT not to be republished

**अभ्यासः—योगदिवसे आयोज्यमाने कार्यक्रमे भगिन्याः सहभागित्वं वर्णयन्तः एकं पत्रं लिखत।**

............................................

............................................

............................................

............................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................................................................................................

..............................................................................

..............................................................................

..............................................................................

© NCERT not to be republished

# (ख) औपचारिकम् पत्रम्

**1. अवकाशार्थं प्रार्थना-पत्रम्।**

सेवायाम्
श्रीमन्त: प्राचार्या:
केन्द्रीयविद्यालय:, जयपुरम्
राजस्थानम्
विषय:- दिनद्वयस्य अवकाशार्थं प्रार्थना-पत्रम्।
महोदया:

सविनयं निवेदयामि यदहं भवत: विद्यालयस्य माध्यमिक-कक्षाया: छात्र: अस्मि। ह्य: विद्यालयात् गृहं गच्छन् अहं ज्वरग्रस्त: अभवम्। यदाहं चिकित्सकं प्रति गत: तदा चिकित्सकेन दिनद्वयस्य विश्रामाय परामर्श: प्रदत्त:।

अत: अहं विद्यालयम् आगन्तुम् असमर्थ: अस्मि। कृपया मम प्रार्थनां स्वीकृत्य दिनद्वयस्य अवकाशं प्रदाय माम् अनुगृह्णन्तु भवन्त: इति।

भवताम् आज्ञाकारी छात्र:
राजीव:
नवमी 'ब'
क्रमाङ्क:-35

दिनाङ्क:-28.11.2017

**क अवकाशार्थं प्राचार्यां प्रति प्रार्थनापत्रम् लिखत।**

सेवायाम्
प्राचार्या
केन्द्रीयविद्यालय: रोहिणी,
दिल्ली
विषय: दिनद्वस्य अवकाशार्थं प्रार्थनापत्रम्
महोदये

..........................................

..........................................

..............................................................................................................................

..............................................................................................................................



© NCERT not to be republished

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..................................................

..................................................

..................................................

..................................................

**2. भगिन्या: विवाहे गन्तुं प्रार्थना-पत्रम्।**

सेवायाम्,
श्रीमन्त: प्राचार्या:
प्रतिभा-विकास-विद्यालय:
वसन्तकुञ्ज:
नवदिल्ली
विषय:- भगिन्या: विवाहे गृहं गन्तुम् अवकाशार्थं प्रार्थना।
महोदया:

सविनयं निवेदयामि यदहं नवम कक्षाया: छात्र: अस्मि। आगामिन: मासस्य द्वितीयायां तिथौ मम ज्येष्ठभगिन्या: विवाह: सुनिश्चित: अस्ति। वरयात्रा गाजियाबादत: आगमिष्यति। भगिन्या: शुभविवाहस्य अवसरे मम उपस्थिति: अनिवार्या अस्ति। अनुज: अस्मि इति कारणात् बहुकार्याणि मया करणीयानि।

कृपया मम स्थितिं विचार्य सप्ताहस्यैकस्य अवकाशं प्रदाय माम् अनुगृह्णन्तु। अध्ययनस्य अवशिष्टं कार्यम् अहम् अवकाशं समाप्य शीघ्रमेव पूरयिष्यामि।

भवताम् आज्ञाकारी शिष्य:,
जयदेव:
नवमी-'स'
क्रमाङ्क:-31

दिनाङ्क:-28.11.2018

© NCERT not to be republished

**क भ्रातु: विवाहे गमनाय प्रार्थना-पत्रम् लिखत।**

सेवायाम्
प्राचार्या,
केन्द्रीय-विद्यालय: चमोली,
महोदये

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................

..........................................................

..........................................................

..........................................................

..........................................................

**3. भवान् अविनाश:। शैक्षिकभ्रमणाय अनुमतिं, व्ययार्थं धनं च प्रार्थयितुं पितरं प्रति मञ्जूषाया: सहायतया पत्रं लिखतु।**

| |
|---|
| स्वाध्याये, भवान्, प्रथमसत्रीया, शैक्षिकभ्रमणस्य, अनुमति:, गन्तुम्, पञ्चशतरूप्यकाणि, प्रेषयन्तु, शीघ्रातिशीघ्रं, प्रतीक्षायाम् |

छात्रावासत:
दिनाङ्क:....................

पूज्यपितृचरणा:,
प्रणतीनां शतम्।

अत्र अहं कुशल: 1........................................व्यापृत: अस्मि। आशासे 2.................. .......................... अपि मात्रा सह आनन्देन निवसति। मम 3........................................परीक्षा सम्पन्ना। परीक्षानन्तरं शिक्षकै: सह छात्राणां 4........................................योजना अस्ति। यदि



© NCERT not to be republished

भवत: 5.......................................स्यात् तर्हि अहमपि तै: सह 6.......................................इच्छामि। सर्वै: एव गन्तुकामै: 7....................................... देयानि सन्ति। भवत: अनुमति: अस्ति चेत् पञ्चशतरूप्यकाणि शुल्काय, पञ्चशतरूप्यकाणि च मार्गव्ययार्थं 8.......................................भवन्त:।

कृपया 9.......................................स्वमन्तव्यं प्रकटयन् पत्रं लिखतु।

भवत: अनुमत्या: 10....................................... भवत: पुत्र:

अविनाश:

**4. पर्वतीयसुषमाया: वर्णनं कुर्वन् स्वमित्रं नमितं प्रति सुमेशस्य पत्रम्।**

प्रिय मित्र नमित,

सप्रेम नमो नम:।

अत्र कुशलं, तत्र अस्तु। दिसम्बरमासे अहं परिवारेण सह कश्मीरप्रदेशम् अगच्छम्। कश्मीरप्रदेशस्य सौन्दर्यं तु दर्शकान् आकर्षयति। विविधै: फलै: युक्ता: वृक्षा: प्रकृते: सौन्दर्यं वर्धयन्ति एव। सर्वत्र एव हरितिमा आसीत्। यत्र कुत्रापि दृष्टि: गच्छति तत्र प्रकृते: सुषमा एव दृश्यते स्म। कश्मीर-प्रदेशस्य डलसर: तु सर्वेषाम् आकर्षणस्य केन्द्रम् अस्ति। यदा अत्र हिमपात: भवति, तदा तस्य वर्णनं कर्तुं न कोऽपि समर्थ: अस्ति। कश्मीरप्रदेश: पृथिव्या: स्वर्ग: एव। यदा भवान् अत्र आगमिष्यति तदा मम कथनस्य सत्यतां ज्ञास्यति।

शेषं सर्वं कुशलम्।

मातापित्रो: चरणयो: प्रणामा:।

भवत: मित्रम्

सुमेश:

दिनाङ्क:-28.11.2018

**5. दण्डशुल्कक्षमापनार्थं प्रधानाचार्यां प्रति पत्रम्।**

परीक्षाभवनत:

दिनाङ्क:.......................

आदरणीया प्रधानाचार्या,

राजकीय: प्रतिभाविद्यालय:

दिल्ली-1100039

महोदये!

सविनयं निवेदनम् अस्ति यत् अहं भवत्या: विद्यालयस्य नवमकक्षाया: छात्र: अस्मि। ह्य: अहं विद्यालयम् विलम्बात् आगच्छम्। अत: अहं कक्षाध्यापिकया पञ्चाशद्रूप्यकै: दण्डित:।

© NCERT not to be republished

मम गृहस्य आर्थिकस्थितिः सुदृढा नास्ति । अतः अहं शुल्कं दातुम् असमर्थः। कृपया मम शुल्कं क्षमित्वा अनुगृह्णन्तु।

धन्यवादः

भवतः शिष्यः

अमितः

**क दण्डशुल्कक्षमापनार्थं प्रधानाचार्यं प्रति प्रार्थना-पत्रम् लिखत।**

..................................................

..................................................

..................................................

..................................................

..................................................

..................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................

..................................................

..................................................

**6. 'ई-मनी' इत्यस्य महत्त्वं वर्णयन्तः पितरं प्रति पत्रं लिखत।**

नवदिल्लीतः

दिनाङ्कः 17.01.2018

सम्मान्याः पितृचरणाः,

सादरं प्रणमामि।

भवतः पत्रम् प्राप्तम्। पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि। जनन्या सह भवताम् अत्र आगमनम् अचिरेण भविष्यति इति ज्ञात्वा विशेष-प्रसन्नता जाता। अद्यैव अहम् ई.मनी इति माध्यमेन मार्गव्ययं प्रेषयामि। सद्यः एव नूतनतया भारतसर्वकारेण प्रवर्तितः एषः ई.माध्यमः



© NCERT not to be republished

अतीव सरल:। भवान् स्व-कोषागारात् प्राप्तम् एटीएम कार्ड इति गृहीत्वा रेलस्थानकं गच्छतु। तत्र एकं कूटसंकेतं प्रदाय भवान् धनं प्राप्तुं शक्नोति।

ई. मनी माध्यमस्य अन्येऽपि लाभा: सन्ति। यथा-चौरस्य भयं न भवति, यत्र-कुत्रापि प्रेषणं सरलं भवति, सर्वकारस्य आदेशेन सर्वे विभागा: एतत् धनं स्वीकुर्वन्ति।

कृपया चिटिकां निर्माय आगमनतिथिं ज्ञापयतु। अहम् उत्सुकतया भवत: पत्रस्य प्रतीक्षां करोमि।

मातु: चरणयो: मे प्रणामा: निवेदनीया:।

भवत: सुपुत्र:

सत्यनारायण भारद्वाज:

**क ‘ई-मनी’ इत्यस्य महत्त्वं वर्णयन्त: मातुलं प्रति पत्रं लिखत।**

© NCERT not to be republished

**7. अतिविश्वासात् हानिः इत्यधिकृत्य मित्राय मञ्जूषायाः सहायतया पत्रं लिखत।**

| अस्तु, पृष्टम्, कारणम्, परीक्षापरिणामः, ईदृशः, मया, अतिविश्वासः, अन्यः, सर्वम् |
|---|

परीक्षाभवनतः

दिनाङ्कः..............................

प्रिय मित्र!

नमो नमः

अत्र कुशलं तत्र 1..............................। भवता 2.............................. यत् प्रथमसत्रपरीक्षायां मम परीक्षापरिणामः कीदृशः अस्ति? प्रथमसत्रपरीक्षायां मम 3.............................. आशानुकूलः न अस्ति। अस्य 4 .............................. अपि मया ज्ञातम्, मम स्वोपरि 5 .............................. एव आसीत् यत् अहं तु सर्वम् एव जानामि। कदाचित् 6 .............................. स्वोपरि विश्वासः मानवाय विनाशकारी भवति। अस्य दुष्परिणामः 7 .............................. तु सोढः परं कोऽपि 8 .............................. अस्य पात्रं न भवेत् इति कृत्वा कथयामि। कदापि स्वोपरि अतिविश्वासः न करणीयः। शेषं 9 .............................. कुशलम्। सर्वेभ्यः मम प्रणामाः।

भवतः मित्रम्

**8. भवान् सुमितः। मञ्जूषायां दत्तैः पदैः सह योगस्य महत्त्वं वर्णयन् स्वमित्रम् अमितं प्रति पत्रं लिखतु।**

| योगस्य, आगताः, प्रभावः, कार्यक्रमे, सिध्यति, प्रेरितान्, जनाः, तैः |
|---|

परीक्षाभवनतः

दिनाङ्कः...............................

प्रिय मित्र **अमित!**

सप्रेम नमो नमः।

अत्र कुशलं तत्र अस्तु। मम पिता योगदिवसे 1 ..............................प्रचारार्थं स्वक्षेत्रे आयोजनं कृतवान्। तस्मिन् 2 ..............................योगविद्यायां कुशलाः अनेके 3 ..............................आगत्य स्वविचारान् प्रकटितवन्तः। एवं ते जनान् योगस्य जीवने स्वीकारार्थं 4 ..............................अपि



© NCERT not to be republished

अकुर्वन्। योगेन किं किं 5 ................................किं किं च प्राप्यते इति अपि 6 ................................ स्पष्टीकृतम्। तेषाम् उद्बोधकानां विचाराणाम् ईदृश: 7 ................................जात: यत् ये अपि जना: तत्र 8 ................................ते योगप्रक्रियां जीवने धारयितुं प्रतिज्ञाम् अकुर्वन्। यदि भवान् अपि अत्र स्यात् तदा स्वयं पश्येत्। अस्तु! शेषं सर्वं कुशलम्।

भवत: मित्रम्

**सुमित:**

**9. भवान् प्रथमसत्रपरीक्षायाम् उत्तमाङ्कान् प्राप्तवान् इति वर्णयन् मित्रं प्रति मञ्जूषाया: सहायतया पत्रं लिखतु।**

| |
|---|
| समयसारणीम्, सर्वम्, अस्तु, अङ्का:, अनुपालनम्, पृष्टम्, कारणम्, कारणात्, परीक्षापरिणाम: |

परीक्षाभवनत:

तिथि: ................

प्रिय मित्र,

**नमोनम:**

अत्र कुशलं तत्र 1................................। भवता 2................................यत् प्रथमसत्रपरीक्षायां मम परीक्षापरिणाम: कीदृश: अस्ति? प्रथमसत्रपरीक्षायां मम 3................................आशानुकूल: अस्ति। अस्य 4................................एतत् अस्ति यत् मया नियमानाम् अनुपालनं कृतम्। खेलनस्य समये खेलनम्, पठनस्य समये पठनम् कृतम्। अस्मात् 5 ................................मया परीक्षायां शोभना: 6 ................................प्राप्ता:। सत्यम् एव एतत् यदि समयस्य 7 ................................क्रियते तदा अस्य परिणामोऽपि शोभन: भवति। भवान् अपि एवं 8 ................................पालयेत्। शेषं कुशलम्। सर्वेभ्य: मम प्रणामा:।

भवत: मित्रम्

**10. अतिवृष्टे: कारणात् विषमं जीवनं यापयन्तं स्वमित्रं प्रति पत्रं लिखत।**

दिल्लीनगरत:

दिनाङ्क:.................

प्रिय मित्र सुमित!

नमो नम:।

© NCERT not to be republished

अत्र कुशलं, भवतः कुशलं कामये। समाचारपत्राद् ज्ञातं यत् चेन्नईनगरस्य जीवनम् अतिवृष्टिकारणात् कठिनं जातमस्ति। सर्वत्र मार्गेषु वीथिषु च जलप्लावनं दृश्यते। यातायातम् अपि प्रभाावितं जातमस्ति। भवान् अस्मिन् विषमे समये कथं जीवनं यापयति इति सूचयतु। अहम् भवतः चेन्नईनगरस्य अन्येषां जनानां च जीवनं पूर्ववत् सुकरं स्यात् इति भगवन्तं प्रार्थये।

भवतः सर्वविधकुशलतायाः कामनया सह...

भवतः मित्रम्
सिद्धार्थः

**क अतिवृष्टेः कारणात् विषमजीवनं यापयन्तीं स्वभगिनीं प्रति पत्रं लिखत।**

..........................................
..........................................

....................................................
....................................................

........................................................................................................................................................................................
........................................................................................................................................................................................
........................................................................................................................................................................................
........................................................................................................................................................................................
........................................................................................................................................................................................
........................................................................................................................................................................................
........................................................................................................................................................................................
नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः।

दरिद्रता धीरतया विराजते,
कुवस्त्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते,
कुरूपता शीलतया विराजते।

**उदाहरणानुसारं लिखत—**

| **शब्दः** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| निर्धन | तृतीया | निर्धनेन | निर्धनाभ्याम् | निर्धनैः |
| जन | .................... | .................... | .................... | .................... |
| धनिक | .................... | .................... | .................... | .................... |
| शाखा | तृतीया | शाखया | शाखाभ्याम् | शाखाभिः |
| लता | .................... | .................... | .................... | .................... |
| रमा | .................... | .................... | .................... | .................... |

**4. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत–**

i. पुत्रः .................... सह गच्छति। (जनकस्य, जनकेन)

ii. सः जनः .................... अन्धः तथापि पराश्रितः न अस्ति। (नेत्रयोः, नेत्राभ्याम्)


iii. .................... हीनः पशुभिः समानः। (विद्यायाः, विद्यया)

© NCERT not to be republished

iv. .................... किं प्रयोजनम्। (धनेन,धनात्)

v. स: .................... बधिर: अस्ति। (कर्णाभ्याम्, कर्णेन)

**5. तृतीया-बहुवचनशब्दानां रचनां कुरुत —**




.............................. .............................. .............................. .............................. .............................. ...............

.............................. .............................. .............................. .............................. .............................. ...............

**6. करणकारकं तृतीयाविभक्तिं च प्रयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणाम्** — 1. गौतमी **<u>कलमेन</u>** लिखति।

2. काशिका यानेन गच्छति।

1. ..............................................................................................................

2. ..............................................................................................................

3. ..............................................................................................................

4. ..............................................................................................................

5. ..............................................................................................................

© NCERT not to be republished

# सम्प्रदानकारकम् (चतुर्थी-विभक्तिः)

## 1. अधोलिखितानि वाक्यानि पठत —



बालः **पठनाय** गच्छति।



जनः **कार्यालयाय** गच्छति।



वृद्धः **भ्रमणाय** गच्छति।



वृद्धा **पूजनाय** गच्छति।



चिकित्सिका **उपचाराय** गच्छति।



कन्या **प्रार्थनायै** गच्छति।

© NCERT not to be republished

- उपरि यानि रेखाङ्कितपदानि सन्ति तानि सम्प्रदानकारके सन्ति। सम्प्रदानकारके चतुर्थी-विभक्तिः प्रयुज्यते।

**यथा — सः <u>पठनाय</u> गच्छति।**

**1. अधोलिखितानि वाक्यानि पठत —**



पिता **<u>बालकाय</u>** क्रुध्यति।



**<u>मह्यं</u>** रोटिका न रोचते।



**<u>इन्द्राय</u>** नमः।

**<u>अग्नये</u>** स्वाहा।





**<u>सर्वेभ्यः</u>** स्वस्ति।

उपरि यानि उदाहरणानि सन्ति तानि उपपदविभक्तेः सन्ति।

- क्रुध् - द्रुह् - ईर्ष्य् - असूय् आदि धातुकारणात् चतुर्थी प्रयुज्यते।
- रुच् कारणात् येभ्यः रोचते तस्मिन् चतुर्थी विभक्तिः प्रयुज्यते।
- नमः स्वस्ति-स्वाहा-स्वधा-अलं-वषट् कारणात् चतुर्थी - विभक्तिः प्रयुज्यते।

© NCERT not to be republished

## अभ्यासः

**1. कोष्ठकप्रदत्तपदैः सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत—**

i. अद्य अधिकांशजनाः शनिवासरे .................... बहिः गच्छन्ति। (मनोरंजन)

ii. ते रात्रौ बहिः ........................ गच्छन्ति। (भोजन)

iii. ........................ ते चिरकालात् पंक्तौ तिष्ठन्ति। (आहार)

iv. ........................सर्वे प्रशंसनीयाः। (सत्कार्य)

v. स्व .................... किं किं कुरुते मानवः (प्रसन्नता)

**2. अधोलिखितशब्दान् उदाहरणानुसारं लिखत—**

- श्रमिकः
  - श्रमिकाय
  - श्रमिकाभ्याम्
  - श्रमिकेभ्यः
- जनः
  - ....................
  - ....................
  - ....................
- लता
  - लतायै
  - लताभ्याम्
  - लताभ्यः
- शाखा
  - ....................
  - ....................
  - ....................
- पत्रम्
  - पत्राय
  - पत्राभ्याम्
  - पत्रेभ्यः
- फलम्
  - ....................
  - ....................
  - ....................
- कृषकः
  - ....................
  - ....................
  - ....................
- रमा
  - ....................
  - ....................
  - ....................
- पुष्पम्
  - ....................
  - ....................
  - ....................

© NCERT not to be republished

**3. चतुर्थी-विभक्तियुक्तपदानि स्थूलरेखया चिह्नितानि कुरुत पृथक्तया लिखत च—**

i. विद्या विवादाय धनं मदाय ..........................

ii. शक्तिः परेषां परपीडनाय। ..........................

iii. खलस्य साधोर्विपरीतमेतत् ..........................

iv. ज्ञानाय दानाय च रक्षणाय॥ ..........................

**4. कोष्ठकात् उचितं पदं चित्वा लिखत—**

i. बालाः .......................... क्रीडाक्षेत्रं गच्छन्ति। (खेलनाय, खेलनस्य)


ii. सूदः .......................... पाकशालां गच्छति। (भोजनपाचनाय, भोजनपाचने)

iii. जनाः .......................... किं किं न कुर्वन्ति। (उदरपूरणाय, उदरपूरणे)

iv. कृषकः .......................... सर्वत्र प्रसिद्धः अस्ति। (परिश्रमे, परिश्रमाय)

v. कुक्कुरः .......................... इतस्ततः भ्रमति। (भोजनं, भोजनाय)

**5. घटात् चतुर्थी - विभक्तियुक्तपदानि चित्वा उचितकोष्ठके लिखत—**




| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... |

## अपादानकारकम् (पंचमी-विभक्तिः)

1. **अधोलिखितानि वाक्यानि पठत—**



अश्वारोही **अश्वात्** पतति।



**लतायाः** पुष्पाणि पतन्ति।




**वृक्षात्** पत्राणि पतन्ति।

**उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि 'अपादानकारके' सन्ति। अपादानकारके 'पंचमीविभक्तिः' प्रयुज्यते**



गंगा **हिमालयात्** निस्सरति।



बालः **अध्यापकात्** पठति।

© NCERT not to be republished

बाल: **<u>अध्ययनात्</u>** प्रमाद्यति।



बाला **<u>विडालात्</u>** बिभेति।





बालक: **<u>गृहात्</u>** बहि:आगच्छति।

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि पंचमी - उपपदविभक्ते: उदाहरणानि सन्ति।

**अभ्यास:**

**1. कोष्ठके प्रदत्तशब्दै: सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।**

i. ........................................ अङ्कुर: प्रभवति। (बीज)

ii. ........................................ विद्युत् उद्भवति। (जल)

iii. ........................................ छात्रा: पठन्ति। (शिक्षक)

iv. ........................................ नद्य: प्रभवन्ति। (पर्वत)

v. ........................................ मा प्रमद:। (स्वाध्याय)

**2. पंचमीविभक्तियुक्तपदम् उदाहरणानुसारं चिह्नितं कुरुत-**

**यथा- <u>काष्ठात्</u> अग्नि: जायते <u>मथ्यमानात्</u>।**

i. कीट: अपि सुमन: सङ्गात् आरोहति सतां शिर:।

ii. धैर्यात् कदाचित् स्थितिम् आप्नुयात् स:।

© NCERT not to be republished



Rationalised 2023-24

iii. विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मः ततः सुखम्।

iv. सत्यात् अपि हितं वदेत्।

v. दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।

**3. उदाहरणानुसारं लिखत —**

| | **शब्दः** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|---|
| यथा— | सैनिकः | पञ्चमी | सैनिकात् | सैनिकाभ्याम् | सैनिकेभ्यः |
| | रक्षकः | ...................... | ...................... | ...................... | ...................... |
| | मनुष्यः | ...................... | ...................... | ...................... | ...................... |
| | महिला | पञ्चमी | महिलायाः | महिलाभ्याम् | महिलाभ्यः |
| | देवी | ...................... | ...................... | ...................... | ...................... |
| | कन्या | ...................... | ...................... | ...................... | ...................... |
| | मित्रम् | पञ्चमी | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| | पात्रम् | ...................... | ...................... | ...................... | ...................... |
| | गात्रम् | ...................... | ...................... | ...................... | ...................... |

**4. यथोचितं योजयत-**

| | | | |
|---|---|---|---|
| पिपीलिका | नरात् | ...................... | ...................... |
| देव | वृद्धायाः | ...................... | ...................... |
| सैनिक | मधुमक्षिकायाः | ...................... | ...................... |
| मधुमक्षिका | सैनिकात् | ...................... | ...................... |
| वृद्धा | देवात् | ...................... | ...................... |
| नर | पिपीलिकायाः | ...................... | ...................... |

© NCERT not to be republished

# सम्बन्धे (षष्ठीविभक्तिः)


**1. अधोलिखितानि वाक्यानि पठत—**



पश्यत। तत्र **वानरस्य** क्रीडा भवति।



सुन्दरं **मयूरस्य** नृत्यम्



**गजस्य** गतिः सुन्दरी।



**कोकिलस्य** गीतं सुन्दरम्।



**कपोतानां** सङ्घटनं प्रसिद्धम्।



**मृगस्य** स्वभावः मुग्धः।



**मधुमक्षिकायाः** स्वभावः मधुसञ्चयः

© NCERT not to be republished

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि सर्वाणि षष्ठीविभक्तेः सन्ति।

**2. अधोलिखितानि वाक्यानि पठत —**

अन्नस्य हेतवे सः तत्र गच्छति।

वृक्षस्य उपरि खगानां निवासः अस्ति।

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि उपपदविभक्तेः सन्ति।
  हेतुः, उपरि आदि शब्दैः सह षष्ठी-विभक्तिः प्रयुज्यते।

## अभ्यासः

**1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत —**

i. बालः.................................अङ्के उपविशति। (पितुः,पित्रा)

ii. अद्य चिकित्सालयेषु.................................सङ्ख्या प्रतिदिनं वर्धते। (रुग्णैः,रुग्णानाम्)

iii. वृक्षाः.................................आधारभूताः सन्ति। (पर्यावरणस्य, पर्यावरणेन)

iv. अद्यत्वे.................................जीवनं कष्टमयं जायते। (नगरात्, नगरस्य)

v. .................................रक्षणाय वृक्षाणाम् आरोपणम् आवश्यकम्। (जीवनम्, जीवनस्य)

**2. षष्ठीविभक्तियुक्तपदानि चित्वा लिखत —**

i. महाजनस्य संसर्गः
कस्य नोन्नतिकारकः।

ii.

अभिवादनशीलस्य
नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते
आयुर्विद्या यशो बलम्।।

© NCERT not to be republished

iii. मानो हि महतां धनम्।

| |
|---|
| ................................................................ |

iv. गच्छन् पिपीलको याति
योजनानां शतान्यपि।

| |
|---|
| |

v. नरस्याभरणं रूपं रूपस्याभरणं गुणः।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा॥

| | | | |
|---|---|---|---|
| | | | |

**3. उदाहरणानुसारं लिखत —**

| | नर | |
|---|---|---|
| नरस्य | नरयोः | नराणाम् |

| | क्षमा | |
|---|---|---|
| ............ | ............ | ............ |

| | वेद | |
|---|---|---|
| ............ | ............ | ............ |

| | नदी | |
|---|---|---|
| ............ | ............ | ............ |


| | तरु | |
|---|---|---|
| ............ | ............ | ............ |

| | विद्या | |
|---|---|---|
| ............ | ............ | ............ |



© NCERT not to be republished


**4. षष्ठीविभक्तियुक्तपदानां रचनां कुरुत-**




.................................... .................................... ....................................

.................................... .................................... ....................................

**याः-** लता, प्रज्ञा, सभा, रमा, क्षमा, विद्या




.................................... .................................... ....................................

.................................... .................................... ....................................

**5. प्रदत्तम् उदाहरणम् अनुसृत्य षष्ठीविभक्तिम् उपयुज्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्** — 1. अहं **विद्यायाः महत्त्वं** जानामि।

2. **कृषकस्य क्षेत्रं हरितम्** अस्ति।

1. ............................................................................................................

2. ............................................................................................................

3. ............................................................................................................

4. ............................................................................................................

5. ............................................................................................................

© NCERT not to be republished

# अधिकरणकारकम् (सप्तमी–विभक्ति:)

**1. अधोलिखितानि वाक्यानि पठत —**



**आकाशे** चन्द्र: उदयति।

**नदीषु** अवकरं मा क्षिप।





**गृहे** कोऽपि नास्ति।

माता **कन्यायां** स्निह्यति।



- उपरि यानि रेखाङ्किकतानि पदानि तानि अधिकरणकारके सन्ति।
- अधिकरणकारके सप्तमी-विभक्ति: प्रयुज्यते। यथा वृक्षेषु खगा: वसन्ति।

**1. अधोलिखितानि वाक्यानि पठत —**

अमित: **बालकानां/बालेषु** श्रेष्ठ: अस्ति।

बाल: **अम्बायां** स्निह्यति।

अद्य बाला: **मित्रेषु** विश्वसन्ति।

- उपरि यानि रेखाङ्कतानि पदानि सन्ति तानि सप्तमी-विभक्तौ सन्ति।
- स्निह्, वि+श्वस्, श्रेष्ठ एतेषां योगे सप्तमीविभक्ते: प्रयोग: भवति।

## अभ्यासः

**1. कोष्ठकात् उचितं पदं चित्वा लिखत —**

i. अद्य तु .................................. अपि वृक्षाः न सन्ति। (पर्वतीयस्थलम्, पर्वतीयस्थले)

ii. चाणक्यो ब्रवीति .................................. अपि विश्वासः न कर्तव्यः। (मित्राय/मित्रे)

iii. कृष्णः .................................. स्निह्यति (गोषु/गवम्)

iv. अद्य बालाः चलदूरभाषस्य .................................. रताः भवन्ति। (प्रयोगे, प्रयोगस्य)

v. .................................. रक्षायाः विषये जागरूकाः भवेयुः। (पर्यावरणस्य,पर्यावरणे)

**2. सप्तमीविभक्तियुक्तपदानि चित्वा लिखत —**

i. उत्सवे व्यसने चैव
दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च,
यस्तिष्ठति स बान्धवः॥

© NCERT not to be republished

ii. परोक्षे कार्यहन्तारम्,
प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृशं मित्रम्,
विषकुम्भं पयोमुखम्।।

................... ...................

iii. न कूपखननं युक्तं
प्रदीप्ते वह्निना गृहे।

................... ...................

iv. सत्यमेवेश्वरो लोके
सत्ये धर्मः समाश्रितः।

................... ...................

**3. उदाहरणमनुसृत्य अधोलिखितान् कोष्ठकान् यथायोग्यपदैः पूरयत —**

| | | | |
|---|---|---|---|
| **यथा जन** | जने | जनयोः | जनेषु |
| विद्वस् | ........... | ........... | ........... |
| आत्मन् | ........... | ........... | ........... |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| राजन् | | | |
| क्षमा | | | |
| नदी | | | |

**4. अधिकरणकारकं सप्तमीविभक्तिं च उपयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्** — 1. **<u>जले</u>** मत्स्या: सन्तरन्ति।

2. **<u>लतायां</u>** पुष्पाणि सन्ति

1. ............................................................
2. ............................................................
3. ............................................................
4. ............................................................
5. ............................................................

© NCERT not to be republished

# सम्बोधनम्

**1. अधोलिखितानि वाक्यानि पठत-**



**हे मेघ,** वर्षां कुरु।

**हे इन्द्रदेव,** वर्षय अधुना।





**हे मेघ,** प्रसन्नोऽस्मि।

- एतानि रेखाङ्कितपदानि सम्बोधने सन्ति।
- सम्बोधने प्रथमा विभक्तिः प्रयुज्यते।
- सम्बोधने केवलं प्रथमायाः एकवचने परिवर्तनं भवति।
- सम्बोधने एकवचने विसर्गस्य लोपः भवति।
- सम्बोधने द्विवचनस्य बहुवचनस्य च रूपाणि प्रथमाविभक्तिवत् प्रचलन्ति।
- सामान्यतया कुत्रचित् सर्वेषाम् पदानाम् अन्ते ',' इति चिह्नस्य प्रयोगः भवति।



Rationalised 2023-24

7

0975CH07

# सन्धिः

**अस्माभिः पठितं यत् वर्णानां संयोजनेन शब्दरचना भवति। क्वचित् क्वचिद् वर्णसंयोजनेन वर्णरूपेषु परिवर्तनमपि जायते।**

**यथा —**

| | | | |
|---|---|---|---|
| सूर्य + आतपे | = | सूर्यातपे | स्वर-सन्धिः |
| प्रत्यवदत् | = | प्रति + अवदत् | |
| तत् + अनन्तरम् | = | तदनन्तरम् | व्यञ्जन-सन्धिः |
| तस्मिन्नेव | = | तस्मिन् + एव | |
| तस्याः + च | = | तस्याश्च | विसर्ग-सन्धिः |
| नृपोऽवदत् | = | नृपः + अवदत् | |

**एतत् वर्णपरिवर्तनमेव सन्धिः, वरिवर्तितवर्णानां मूलरूपेषु पुनः आनयनं च सन्धिविच्छेदः। अधुना विस्तरेण जानीम : —**

**1. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + अ, आ = आ

i. सूर्य + आतपे = सूर्यातपे (अ+आ=आ)

ii. लोभ + आविष्टा = .................. (..................)

iii. आगतास्ति = .................. + .................. (..................)

iv. एव + अस्य = .................. (..................)

v. पूर्वार्द्धः .................. = .................. (..................)

**(ख)** इ, ई + इ, ई = ई

i. अति + इव = अतीव (इ+इ=ई)

ii. नदी + इयम् = .................. (..................)

iii. कपि + ईदृशः = .................. (..................)

© NCERT not to be republished

iv. लघ्वीति = .................... + .................... (....................)

v. कपीन्द्रः = .................... + .................... (....................)

**(ग)** उ, ऊ + उ, ऊ = ऊ

i. गुरु + उचितम् = गुरूचितम् (उ+उ=ऊ)

ii. भानु + उदयः = .................... (....................)

iii. लघूर्मिः .................... + .................... (....................)

iv. भू + ऊर्ध्वम् = .................... (....................)

v. साधूपदेशः = .................... + .................... (....................)

**(घ)** ऋ, ॠ + ऋ, ॠ = ॠ

i. पितृ + ऋणम् = पितॄणम् (ऋ+ऋ=ॠ)

ii. मातृ + ऋद्धिः = .................... (....................)

iii. भ्रातॄणम् .................... + .................... (....................)

| |
|---|
| 'अकः सवर्णे दीर्घः', इति सूत्रेण समान-स्वरवर्णयोः दीर्घादेशः भवति।<br>एषः 'दीर्घसन्धिः' इति कथ्यते। |

**2. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + इ, ई = ए

i. अनेन + इति = अनेनेति (अ+इ=ए)

ii. यथा + इच्छया= .................... (....................)

iii. मातेव = .................... + .................... (....................)

iv. लतेयम् = .................... + .................... (....................)

**(ख)** अ, आ + उ, ऊ = ओ

i. वृक्षस्य + उपरि= वृक्षस्योपरि (अ+उ=ओ)

ii. सूर्योदयात् = .................... + .................... (....................)

iii. घृत+ उत्पत्तिः = .................... (....................)

iv. मानवोचितम् = .................... + .................... (....................)

v. गृह + उद्यानम् = .................... (....................)



© NCERT not to be republished

**(ग)** | अ, आ + ऋ, ॠ = अर् |

i. महा + ऋषि: = महर्षि: (आ+ऋ=अर्)

ii. देवर्षि: = ...................... + ...................... (......................)

iii. वसन्त + ऋतु:= ...................... (......................)

iv. वर्षर्तु: = ...................... + ...................... (......................)

| 'आद् गुण:' इति सूत्रेण अ-आ-वर्णयो:, इ,ई उ,ऊ/ऋ, ॠ वर्णाभ्यां सह मेलनेन क्रमश:-ऐ, ओ, अर् इति भवन्ति। एष: गुणसन्धि: इति कथ्यते। |

**3. यथापेक्षितं सन्धिं विच्छेदं वा कुरुत —**

**(क)** | अ, आ + ए, ऐ = ऐ |

i. गत्वा + एव = गत्वैव (आ+ए=ऐ)

ii. एव + एनम् = ...................... (......................)

iii. क्षणेनैव = ...................... + ...................... (......................)

iv. न + एतादृश: = ...................... (......................)

v. महैरावत: = ...................... + ...................... (......................)

**(ख)** | अ, आ + ओ, औ = औ |

i. जल + ओघ: = जलौघ: (अ+ओ=औ)

ii. तव + औदार्यम्= ...................... (......................)


iii. वनौषधि: = ...................... + ...................... (......................)


iv. महा + औत्सुक्येन= ...................... (......................)

v. जनौघ: = ...................... + ...................... (......................)

| **'वृद्धिरेचि' इति सूत्रानुसारेण अ,आ वर्णयो: क्रमश: ए, ऐ/ओ, औ वर्णाभ्याम् सह मेलने जाते क्रमश: 'ऐ', 'औ' इति भवति। एष: 'वृद्धिसन्धि:' इति कथ्यते।** |

© NCERT not to be republished




| | |
|---|---|
| अधिकारः (अधि + ……………) | आचारः (आ + ……………) |
| अधिगमः (अधि + ……………) | आधारः (आ + ……………) |
| अधिकरणम् (…………… + करणम्) | आहारः (आ + ……………) |
| अधिरोहति (…………… + रोहति) | आगमनम् (आ + ……………) |

**4. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** इ, ई + असमान-स्वरः= इ, ई स्थाने य् + स्वरः

i. प्रति + अवदत्= प्रत्यवदत् (इ+अ=य)

ii. यदि + अहम् = …………… (……………)

iii. तानि + एव = …………… (……………)

iv. पर्यावरणम् = …………… + …………… (……………)

v. इत्यवदत् = …………… + …………… (……………)

**(ख)** उ, ऊ + असमानः स्वरः= उ, ऊ स्थाने व् + स्वरः

i. खलु + अयम् = खल्वयम् (उ+अ=व)

ii. मधु + अरिः = …………… (……………)

iii. गुणेष्वेव = …………… (……………)

iv. विरमन्तु + एते = …………… + …………… (……………)

v. स्वागतम् = …………… + …………… (……………)

**(ग)** ऋ, ॠ + असमान-स्वरः= ऋ स्थाने र् + स्वरः

i. पितृ+ आदेशः= पित्रादेशः (ऋ+आ=रा)

© NCERT not to be republished

ii. मात्राज्ञा = ………… + ………… (…………)

iii. भ्रातृ + इच्छा = ………… (…………)

iv. कर्तृ + उपदेश: = ………… (…………)

v. पित्रनुमति: = ………… + ………… (…………)

> **'इको यणचि' सूत्रानुसारम् इ, ई/उ, ऊ/ ऋ, ॠ स्वराणाम् असमानस्वरेण सह मेलनेन इ, ई/उ,ऊ/ऋ, ॠ वर्णानां स्थाने क्रमश: य्, व्, र् इति भवन्ति, परवर्ती स्वर: च एतै: सह मात्रारूपेण प्रयुज्यते।**

**5. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)**

> म् + व्यञ्जनवर्ण: = म् स्थाने अनुस्वार:
> म् + स्वर: = म् वर्णे स्वरस्य संयोग:

i. त्वम् + यासि = त्वं यासि (संधि:)

ii. अहम् + इच्छामि = ………… (…………)

iii. किम्+ कथयति = ………… (…………)

iv. अयम् + राजा = ………… (…………)

v. माम् + मुञ्च = ………… (…………)

vi. कथमागत: = ………… + ………… (…………)

vii. अयम् +राजा = ………… (…………)

viii. हर्तुम् +इच्छति = ………… (…………)

ix. सन्ध्याम् + यावत् = ………… (…………)

> 'मोऽनुस्वार:' इति सूत्रानुसारं 'म्' इति वर्णस्य पश्चात् यदि कोऽपि व्यञ्जनवर्ण: भवति तर्हि 'म्' वर्णस्य स्थाने अनुस्वार: भवति।

© NCERT not to be republished

## अभ्यासः

1. **प्रदत्त-पदेषु सन्धिं विच्छेदं वा कुरुत —**

i. हिताहितम् = .................... + ....................
ii. पश्चिमोत्तरम् = .................... + ....................
iii. वृथा + अटनम् = ....................
iv. इति + उभौ = ....................
v. नमाम्येनम् = .................... + ....................
vi. वृकोदरेण = .................... + ....................
vii. राजमार्गेण + एव= ....................
viii. इहागतः = .................... + ....................
ix. पूर्व + इतरम् = ....................
x. वदतीति = .................... + ....................
xi. तव + औषधम् = ....................
xii. राजर्षिः = .................... + ....................
xiii. अत्रान्तरम् = .................... + ....................
xiv. अहम् + गच्छामि = ....................
xv. खलु + एषः = ....................
xvi. साधूक्तम् = .................... + ....................
xvii. मातृ + ऋणम् = ....................

© NCERT not to be republished




Rationalised 2023-24

8

0975CH08

# उपसर्गाव्ययप्रत्यया:




उपरि वयं पश्याम: यत् 'हार:' इति पदस्य भिन्नै: उपसर्गै: सह संयोगे जाते अर्थपरिवर्तनमपि सञ्जातम्। उपसर्ग-विषये उच्यते—


**"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहार-संहार-विहार-परिहारवत्।।"**


उपसर्ग-विषये ज्ञातव्यम् यत्—

- उपसर्ग: शब्दात् धातो: च पूर्वं भवति।
- उपसर्गेण कदाचित् अर्थे परिवर्तनं कदाचिच्च अर्थस्य पोषणं भवति।
- कदाचित् एकस्मिन् शब्दे द्वित्रा: उपसर्गा: अपि भवन्ति।

© NCERT not to be republished


**1. उपसर्गान् संयोज्य पदरचनां कुरुत—**





विशेष: (वि + शेष:)
विकार: (वि + कार:)
विहार: (वि + हार:)
विवाद: (वि + वाद:)

सुगन्ध: (सु + गन्ध:)
सुकन्या (सु + कन्या)
सुबुद्धि: (सु + बुद्धि:)
सुदर्शन (................ + ................)




अपमान: (अप + मान:)
अपयश:(................ + ................)
अपकार: (अप + कार:)

दुर्दशा (................ + ................)
दुर्बुद्धि: (दुर्+ बुद्धि:)
दुर्जन: (................ + ................)
दुराचारी (दुर् + आचारी)

© NCERT not to be republished

**2. उपसर्गं संयोज्य उचितैः धातुरूपैः रिक्तस्थानानि पूरयत—**

i. गङ्गा हिमालयात् ............................................ । (निस् + सृ, लट्)

ii. कृषकाः क्षेत्रात् ............................................ । (आ+गम्, लङ्)

iii. वयं नियमान् ............................................ । (परि + पाल्, लट्)

iv. छात्राः गुरौ आगते ............................................ । (उत्+स्था, लोट्)

v. विडालः मूषकम् ............................................ । (अनु+सृ, लट्)

vi. त्वं कक्षायां पाठं ध्यानेन ............................................ । (अव + गम्, विधि.)

vii. बीजात् वृक्षः ............................................ । (उद्+भू, लृट्)

viii. सेवकाः स्वामिनम् ............................................ । (उप+सेव्+लट्)

ix. अद्याहं शीतं न ............................................ । (अनु+भू+लट्)

**3. उचितैः उपसर्गयुक्तैः पदैः रिक्तस्थानानि पूरयत—**

i. एषः मार्गः अतीव ............................................ । (दुर् + गमः)

ii. कस्यापि अवगुणस्य ............................................ मा कुरु। (उत् + लेखम्)

iii. ............................................ अपि ............................................ न करणीयः। (निर् + धनस्य, अप+मानः)

iv. तव एतावत् ............................................ यत् मम् ............................................ करोषि (दुस् + साहसम्, अप्+मानम्)

v. क्षम्यताम्, ............................................ अहं तव ............................................ करोमि। (निस्+सन्देहम्, सम्+मानम्)

vi. लोकस्य ............................................ एव श्रेयस्करम् । (सम्+रक्षणम्)

© NCERT not to be republished



Rationalised 2023-24

# अव्ययपदानि

| अव्ययपद | अर्थ | अव्ययपद | अर्थ |
|---|---|---|---|
| अभित: | दोनों ओर | यथा-तथा | जैसे-तैसे |
| परित: | चारों ओर | यदा-तदा | जब-तब |
| उभयत: | दोनों ओर | यत्र-तत्र | जहाँ-वहाँ |
| सर्वत: | सब ओर | उपरि-अध: | ऊपर-नीचे |
| समन्तत: | चारों ओर | | |
| अधुना | अब | श्व: | (आने वाला कल) |
| | | ह्य: | (बीता हुआ कल) |
| सम्प्रति | अब | चेत् | यदि, तो |
| इदानीं | अब | उच्चै:-नीचै: | ऊपर-नीचे |
| यावत् | जब तक | सर्वत्र | सब ओर |
| तावत् | तब तक | कुत्र | कहाँ |
| सदा | हमेशा | एकत्र | एक स्थान |
| सततम् | हमेशा | कथम् | क्यों, कैसे |
| शनै:-शनै: | धीरे-धीरे | कथञ्चित् | जैसे-तैसे |
| भूयो भूय: | बार-बार | कुत: | कहाँ से |
| मुहुर्मुहु: | बार-बार | अजस्रम् | निरंतर |
| असकृत् | बार-बार | नूनम् | निश्चय ही |
| सहसा | अचानक | खलु | निश्चय ही |
| अकस्मात् | अचानक | किल | निश्चय ही |
| सद्य: | तुरन्त | एवमेव | ऐसा ही |
| सपदि | तुरन्त | ध्रुवम् | अवश्य |
| झटिति/शीघ्रं | तुरन्त | किञ्चन | कुछ |
| एकदा | एकबार | किञ्चित् | कुछ |
| सकृत् | एकबार | केवलम् | केवल |
| अचिरात् | अभी | ईषत् | थोड़ा सा |
| अचिरेण | अभी | तूष्णीम् | चुपचाप |



© NCERT not to be republished

| | | | |
|---|---|---|---|
| अचिरम् | अभी | मा | मत |
| अपरम् | और भी | न | नही |
| च | और | | |
| अथ किम् | हाँ, और क्या | ऋते | बिना |
| कदाचित् | कभी, किसी समय | समया | समीप |
| पुरा | प्राचीन काल में | निकषा | समीप |
| अपि | भी | अन्यथा | अन्यथा |
| वृथा | व्यर्थ | | |

**1. निम्नलिखितानाम् अव्ययानां रिक्तस्थानेषु प्रयोगं कुरुत—**

**सहसा, अपि, सर्वदा, यदा, अचिरम्, श्व:, ह्य:, इदानीम्, तदा**

i. ........................................ निर्णय: न करणीय:।

ii. ........................................ गृहम् गच्छ।

iii. अहम् ........................................ वाराणसीं गमिष्यामि।

iv. ........................................ प्रात: भ्रमणं कुर्यात्।

v. ........................................ मम गृहे उत्सव: आसीत्।

vi. ........................................ अहं संस्कृतं पठामि।

vii. त्वं किम् ........................................ गच्छसि?

viii. ........................................ अहम् गमिष्यामि ........................................ स: अत्र आगमिष्यति।

**2. अधोलिखितेषु वाक्येषु अव्ययपदानि प्रयुक्तानि तानि पदानि चित्वा यथास्थानं लिखत—**

i. यावत् परीक्षाकाल: नायाति तावत् परिश्रमं कुरु।

..............................................................................................

ii. काल: वृथा न यापनीय:।

..............................................................................................

iii. अहं सम्प्रति गृहं गन्तुम् इच्छामि।

..............................................................................................

© NCERT not to be republished

iv. यत्र-यत्र धूम: तत्र-तत्र अग्नि: सम्भाव्यते।

..........................................................................................

v. पुरा अशोक: नाम राजा आसीत्।

..........................................................................................

vi. शीघ्रं कार्यं समापय अन्यथा विलम्ब: भविष्यति।

..........................................................................................

vii. अद्य प्रभृति अहं धूमपानं न करिष्यामि।

..........................................................................................

viii. ईषत् हसित्वा स: तस्य उपहासं कृतवान्।

..........................................................................................

ix. स: मुहुर्मुहु: किम् पश्यति?

..........................................................................................

x. अहम् त्वाम् भूयो भूय: नमामि।

..........................................................................................

**3. कोष्ठकेभ्य: शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत —**

i. अहं श्व: भ्रमणाय.................................. गमिष्यामि। (विना/ध्रुवम्)

ii. विद्यालयम् .................................. उद्यानमस्ति। (समन्तत:/अन्यत्र)

iii. .................................. वद। (उच्चै:/नीचै:)

iv. .................................. स: पुस्तकं पठति। (अधुना/पुरा)

v. त्वम् .................................. गच्छसि? (कुत्र/एकत्र)

vi. कोलाहलं .................................. कुरु। (मा/एव)

vii. अध्यापकं दृष्ट्वा छात्र: .................................. स्थित:। (तूष्णीं/मुखर:)

viii. सुरेश: आपणं गच्छति .................................. च मित्रेण सह क्रीडिष्यति।(अपि/अपरम्)



Rationalised 2023-24

© NCERT not to be republished

**4. निम्नलिखित-अव्ययपदानां रिक्तस्थानेषु प्रयोगं कुरुत-**

**कुत:, सहसा, नूनम्, यदि-तर्हि, प्राय:, अद्य, चिरम्, अथ, सर्वत्र, सदा**

i. भवान् .................................... आगत:?

ii. .................................... पिपासा अस्ति .................................... जलं पिबतु।

iii. प्रज्ञा ....................................आगच्छति।

iv. .................................... जना: साक्षरा: सन्ति।

v. .................................... अद्य वर्षा भविष्यति।

vi. .................................... सोमवासर: अस्ति।

vii. पुष्पं .................................... गन्धयति।

viii. .................................... कथा प्रारभ्यते।

ix. ईश्वर: .................................... अस्ति।

x. माता पुत्री च .................................... नृत्यत:।

**योग्यता-विस्तार —**

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

अव्ययपदस्य रूपपरिवर्तनं न भवति।
त्रिषु लिङ्गेषु समानं रूपम्।
सप्तसु विभक्तिषु समानं रूपम्।
त्रिषु वचनेषु समानं रूपम्।

© NCERT not to be republished

## प्रत्ययाः

### कृत्प्रत्ययाः



**शिष्यः गुरुमुपगम्य पठति।**



**पुस्तकं पठन्ती बालिका हसति।**






**बालिका पुस्तकं पठितुम् आगच्छति।**



**बालकः पुस्तकं पठित्वा गच्छति।**

अत्र वयं पश्यामः यत् पठ्-धातो प्रयोगः विभिन्नेषु अर्थेषु भवति। अर्थस्य एषा विभिन्नता प्रत्ययानां प्रयोगेण सम्भवति। उपसर्गाः शब्देभ्यः धातुभ्यः वा पूर्वं संयुज्य अर्थपरिवर्तनं कुर्वन्ति, प्रत्ययाश्च शब्देभ्यः धातुभ्यः वा पश्चात् संयुज्य अर्थ-विस्तारं कुर्वन्ति।

### क्त्वा-प्रत्ययः

(वाक्य में मुख्य क्रिया से पूर्व किए गए कार्य में पूर्वकालिक क्रिया को व्यक्त करने के लिए धातु में क्त्वा प्रत्यय का योग किया जाता है।)

यथा— बालः आपणं <u>**गत्वा**</u> फलानि आनयत्। (गम् + क्त्वा = गत्वा)

© NCERT not to be republished

**अध: प्रदत्त-वाक्यानि पठन्तु —**

स: बहि: **दृष्ट्वा** आगच्छति। (दृश् + क्त्वा)

रमेश: मित्रं **स्पृष्ट्वा** अधावत्। (स्पृश् + क्त्वा)

स: दुग्धं **पीत्वा** शयनं करोति। (पा + क्त्वा)

गुरुं **पृष्ट्वा** एव कक्षाया: बहिर्गच्छ। (प्रच्छ् + क्त्वा)

अत्र **गत्वा, दृष्ट्वा, स्पृष्ट्वा, पीत्वा, पृष्ट्वा** इति शब्देषु **'क्त्वा'** प्रत्ययस्य प्रयोग: अस्ति। एकेन कर्त्रा यदा एकं कार्यं सम्पाद्य अन्यत् कार्यं क्रियते तदा प्रथमक्रियायामस्य प्रत्ययस्य प्रयोग: भवति।

**1. कोष्ठके प्रदत्तधातुषु क्त्वाप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत-**

i. राम: रावणं .................................... सीतां प्राप्नोत्। (हन्)

ii. प्रश्नस्य उत्तरं .................................... छात्र: प्रसीदति। (ज्ञा)

iii. सीता गीतायै पुस्तकं .................................... गच्छति। (दा)

iv. सा कथां .................................... श्रावयति। (लिख्)

v. श्रोतार: कथां .................................... प्रसन्ना: भवन्ति। (श्रु)

vi. बाला: .................................... आगच्छन्ति। (धाव्)

vii. पुष्पं .................................... प्रसीदाम:। (घ्रा)

viii. गायक: गीतं .................................... संतुष्टिं प्राप्नोति। (गै)

### ल्यप् प्रत्यय:

(पूर्वकालिक क्रिया के अर्थ में ल्यप् प्रत्यय का भी प्रयोग होता है। जहाँ धातु से पूर्व कोई उपसर्ग लगा होता है वहाँ क्त्वा के स्थान पर ल्यप् प्रत्यय का प्रयोग किया जाता है।

यथा — स: गुरुं **प्रणम्य** कक्षां गच्छति।

**2. अधुना एतानि वाक्यानि पठन्तु भेदं चावगच्छन्तु —**

बाल: पितरम् **अनुगम्य** कार्यं करोति। (अनु + गम् + ल्यप्)

अहं कार्यं **समाप्य** एव गमिष्यामि। (सम् + आप्+ ल्यप्)

त्वम् वृक्षम् **आरुह्य** किं करोषि? (आ + रुह् + ल्यप्)

महोदये! वृक्षात् फलं **प्राप्य** तुष्टो भवामि। एतेषु वाक्येष्वपि एकं कार्यं कृत्वा एवापरं कार्यं क्रियते परं यदा वयं ध्यानेन एतानि वाक्यानि पठाम: तदा स्पष्टं भवति यदत्र **क्त्वा-स्थाने** ल्यप्

© NCERT not to be republished

प्रत्ययस्य प्रयोग: अस्ति, यत: अत्र धातूनां प्रयोग: उपसर्गेण सह कृत:। अत: अत्र क्त्वास्थाने ल्यप्प्रत्यय: अस्ति। अधुना प्रकृति-प्रत्यय-विभागेन विस्तरेण अवगच्छाम: —

| यथा — | **प्रकृति:** | **प्रत्यय:** |
|---|---|---|
| अनुगम्य | अनु+ गम् | ल्यप् |
| i. प्रणम्य | प्र+नम् | .................... |
| ii. .................... | सम्+आप् | ल्यप् |
| iii. आरुह्य | ....................+.................... | .................... |
| iv. आदाय | ....................+.................... | ल्यप् |

**3. समुचितप्रत्यय-प्रयोगेण वाक्यानि पूरयत —**

**छात्र: कक्षायाम् .................... (उत्थाय/उत्थात्वा) प्रश्नं पृच्छति। शिक्षक: उत्तरम् .................... (प्रदात्वा/प्रदाय) तं सन्तोषयति। छात्र: उत्तरं .................... (ज्ञात्वा/ज्ञाय) प्रसन्न: भवति। सन्तुष्ट: .................... (भूत्वा/भवित्वा) पाठं च सम्यक् ....................(अवगत्वा/अवगत्य) गृहं गच्छति।**

## तुमुन्

[निमित्तार्थक के लिए अर्थात् क्रिया को करने के लिए धातु के साथ तुमुन् प्रत्यय लगता है।]

यथा— बालक: नाटकं **द्रष्टुम्** गच्छति। (दृश् + तुमुन्)

**4. अधुना एतानि वाक्यानि पठन्तु-**

अहं जलं **पातुम्** इच्छामि। (पा + तुमुन्)

मयूर: **नर्तितुम्** स्वपक्षान् उद्घाटयति। (नृत् + तुमुन्)

विद्यालयं **गन्तुम्** छात्रा: सज्जा: सन्ति। (गम् + तुमुन्)

पिता पुत्राय पुस्तकानि **क्रेतुम्** आपणं गच्छति। (क्री + तुमुन्)

अत्र **द्रष्टुम्, पातुम्, नर्तितुम्, गन्तुम्, क्रेतुम्,** इति शब्देषु 'तुमुन्' प्रत्ययस्य प्रयोग: अस्ति। प्रायश: चतुर्थीविभक्तयर्थे 'तुमुन्' प्रत्ययस्य प्रयोग: भवति।

**उपरि प्रयुक्तानां तुमुन्-प्रत्ययान्तपदानां प्रकृति-प्रत्यय-विभागं कृत्वा लिखत-**

i. द्रष्टुम्- .................... + ....................

ii. पातुम्- .................... + ....................

iii. नर्तितुम्- .................... + ....................



© NCERT not to be republished

iv. गन्तुम्- ........................ + ........................

v. क्रेतुम्- ........................+........................

**2. अधुना कोष्ठके प्रदत्तधातुषु तुमुन्-प्रत्ययस्य योगेन रिक्तस्थानानि पूरयत-**

**एक: चौर: एकस्मिन् गृहे चौर्यं कृत्वा ........................ (धाव्) इच्छति। गृहस्वामी तं दृष्ट्वा तं ........................ (गृह्) धावति। मार्गे एक: वत्स: धेनो: क्षीरं ........................ (पा) तिष्ठति। छात्रा: अपि ........................ (पठ्) विद्यालयं गच्छन्ति स्म। अत: जनसम्मर्दे धेनुना आहत: चौर: आत्मानं ........................ (रक्ष्) असमर्थ: अभवत्। अत: गृहस्वामी जनै: सह चौरं ........................(बन्ध्) समर्थ: अभवत्।**

### शतृ-प्रत्यय:

(एक कार्य को करते हुए जब अन्य कार्य भी किया जा रहा हो तो परस्मैपदी धातु के साथ शतृ प्रत्यय तथा आत्मनेपदी धातुओ में शानच् प्रत्यय का प्रयोग किया जाता है।)

यथा— 1. **गायन्ती** बालिका नृत्यति। (गै+ शतृ+ स्त्री.)

2. **मोदमान:** बालक: पित्रे अङ्कसूचीं प्रदर्शयति। (मुद् + शानच्)

**1. अध:प्रदत्तानि वाक्यानि ध्यानेन पठन्तु —**

**गच्छन्** बालक: अपतत्। (गम्+ शतृ)

**रुदन्तं** बालकं रोदनस्य कारणं पृच्छ। (रुद् + शतृ)

कथां **कथयता** कथावाचकेन अद्य का कथा श्राविता? (कत् + शतृ + तृतीया विभक्ति)

**हसत:** बालकस्य नाम किम् अस्ति? (हस् + शतृ + षष्ठी)

एतेषु वाक्येषु गायन्ती, गच्छन्, रुदन्तम्, कथयता, हसत: इत्येता: क्रिया: अपूर्णा: सन्ति परं नृत्यति, अपतत्, पृच्छ, श्राविता, अस्ति इत्यादिभि: क्रियाभि: वाक्यानि पूर्णतां प्राप्नुवन्ति। वाक्ये शतृप्रत्यययुक्त: धातु: शब्दरूपेण परावर्तते, शब्दप्रयोगश्च विशेष्यरूपेण भवति। अत: अस्य लिङ्ग-विभक्ति- वचनञ्च विशेषणानुसारं निर्धार्यन्ते।

संयोजनेन शतृप्रत्ययस्य 'अत्' इति धातुषु प्रयुज्यते। पुल्लिङ्गे रूपाणि 'गच्छत्' शब्दानुसारं, स्त्रीलिङ्गे पुन: 'ती' इति संयोज्य (गच्छन्ती) 'नदी' शब्दानुसारं, नपुंसकलिङ्गे च 'जगत्' इति शब्दानुसारं भवन्ति।

© NCERT not to be republished

**2. अधोलिखितानि वाक्यानि पठित्वा अधुना एतत्सर्वम् प्रयोगेण जानीमः —**

यथा- **(गम् + शतृ )** गच्छन्त्या बालिकया फलं खाद्यते।

| **हसन्तम्, पृच्छद्भिः, गच्छन्त्या, पश्यन्तः, यच्छते।** |
|---|

i. पिता .................. **(हस् + शतृ)** पुत्रं पठनाय कथयति।

ii. पुस्तकं .................. **(दा + शतृ)** छात्राय पुस्तकालयाध्यक्षः परीक्षायाः प्रवेशपत्रं यच्छति।

iii. नाटकं .................. **(दृश् + शतृ)** दर्शकाः करतलवादं कुर्वन्ति।

iv. मार्गं .................. **(प्रच्छ् + शतृ)** पथिकैः छायायां विश्रम्यते।

**3. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पूरयत —**

i. रूप्यकाणि .................. श्रमिकः प्रसन्नः भवति। (गणयन्/गणयतागणयन्तम्)

ii. जलं .................. छात्रेण कक्षायां स्थीयते (पिबन्/पिबता/पिबन्तम्)

iii. पुत्रीं .................. (पाल् + शतृ) माता गीतं गायति (पालयन्ती/पालयत्यै/पालयन्तीम्)

iv. भोजनं .................. (पच् + शतृ) सूदाय शाकानि प्रयच्छ। (पचन्तम्/पचति/पचते)

v. सः उपरि .................. (दृश् + शतृ) पतति। (दृश्यन्/पश्यन्/पश्यन्ती)

### शानच् प्रत्ययः

**याचमानाय** भिक्षुकाय धनं यच्छ।

वृद्धाश्रमे **सेवमानानां** बालिकानां नामानि वद।

पूर्णचन्द्रेण **शोभमानायां** निशायां नौकाविहारः अतीव रोचते।

मालाकारः उद्यानात् पुष्पाणि **नयन्तीम्** बालिकां पुष्पत्रोटनात् वारयति।

अत्रापि मोदमानः, याचमानाय, सेवमानानाम्, शोभमानायाम्, नयन्तीम् इत्येतानि पदानि अपूर्णक्रियायै प्रयुक्तानि परमत्र शतृप्रत्ययस्य स्थाने शानच् प्रत्ययः प्रयुक्तः यतः अत्र प्रयुक्ताः धातवः आत्मनेपदिनः सन्ति। अस्य प्रत्ययस्य शकारः मकारे परिवर्त्य चकारस्य लोपेन 'मान' इति अशं धातुभिस्सह संयोज्य शब्दनिर्माणं भवति। पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च शब्दरूपाणि क्रमशः देववत्, रमावत्, फलवच्च भवन्ति।



© NCERT not to be republished
Rationalised 2023-24

**1. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पूरयत —**

i. नाटकम् .................... जना: प्रसीदन्ति। (ईक्षमाण:/ईक्षमाणौ/ईक्षमाणा:)

ii. सज्जनानां मैत्री क्रमेण .................... भवति। (वर्धमाना/वर्धमाने/वर्धमाना:)

iii. शीतेन .................... वानरं खगा: गृहनिर्माणाय अकथयन् (कम्पमान:/कम्पमानम्/कम्पमानेन)

iv. दीपावल्यां प्रकाशेन .................... वीथिषु अमावस्याया: अन्धकार: सर्वथा नश्यति। (शोभमानायाम्/शोभमानयो:/शोभमानासु)

v. वृद्ध: .................... बालिकायै आशीर्वचनानि कथयति। (सेवमानाया:/सेवमानाम्/सेवमानायै)

**2. उदाहरणानुसारं पूर्वक्रियायां शतृ/शानच् प्रत्यय-प्रयोगेण वाक्यानि पुन: लिखत-**

**यथा**– शिशु: चलति, स: रोदिति – **चलन्** शिशु: रोदिति।

याचक: याचते। स: एकं गृहं गच्छति।

**यथा**– **याचमान:** याचक: एकं गृहं गच्छति।

उपदेशक: उपदिशति। स: ज्ञानचर्चां करोति।

उषा गायति। सा उद्याने भ्रमति।

सैनिक: युद्धक्षेत्रे प्रहरति। स: शत्रुं मारयति।

बालिका दुग्धं पिबति। सा प्रसन्ना भवति।

मोहन: दु:खं सहते। स: ईश्वरं प्रार्थयति।

### क्तिन् प्रत्यय: (ति)

देश की बहुत सी भाषाओं में क्तिन् प्रत्ययान्त शब्दों का प्रयोग होता है, जिन्हें हम सहजता से समझ सकते हैं।

अस्य प्रत्ययस्य प्रयोग: भाववाचकसंज्ञापदानां निर्माणाय भवति यथा —

श्रु + क्तिन् - श्रुति:
स्तु + क्तिन् - स्तुति:
कृ + क्तिन् - कृति:
मन् + क्तिन् - मति:

© NCERT not to be republished

एतेषां पदानां शब्दरूपाणि मतिशब्दवद् भवन्ति।

**1. अधोलिखितवाक्येभ्य: क्तिन्–प्रत्यययुक्तान् शब्दान् आदाय उदाहरणानुसारं प्रकृति-प्रत्यय-विभागं कुरुत —**

| | | | |
|---|---|---|---|
| रामायणम् वाल्मीकेः कृतिः अस्ति- | कृति:- | कृ+ | क्तिन् |
| i. मनुष्यजन्मन: प्राप्ति: पुण्येन भवति। | ........................ | ........................ | ........................ |
| ii. रमाया: बुद्धि: अत्युत्तमा। | ........................ | ........................ | ........................ |
| iii. भक्त: ईश्वरस्य भक्तिं करोति। | ........................ | ........................ | ........................ |
| iv. वानरस्य दृष्टि: फले अस्ति। | ........................ | ........................ | ........................ |
| v. सिंहात् कस्य भीति: न जायते? | ........................ | ........................ | ........................ |

## तद्धितप्रत्यया:

### मतुप् (मत्)

देश की बहुत सी भाषाओं में मतुप् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं। वाला अर्थात् इसके पास है, इस अर्थ में स्वरान्त शब्दों से मतुप् प्रत्यय का योग किया जाता है। उप् का लोप होकर केवल यत् जुड़ता है।

यथा — **शक्तिमान्** जन: स्वशक्ते: प्रयोगं यथास्थानमेव कुर्यात्।

**श्रीमान्** श्रिया युक्त: भवति।

**बलवान्** जन: स्वबलस्य प्रयोगं दुर्बलेषु न कुर्यात्।

**गुणवान्** एव गुणानां महत्त्वं जानाति।

**कीर्तिमत:** कीर्ति: स्वयमेव प्रसरति।

'अस्यास्ति' इत्यर्थे युक्ततायाः बोधने मतुप् (मत्) प्रत्ययस्य प्रयोग: भवति। शब्दान्ते अकार: यद्यस्ति तदा **'मतुप् (मत्)'** इत्यस्य परिवर्तनं **'वतुप् (वत्)'** इत्येतस्मिन् भवति।

प्रत्यययोजनानन्तरं रूपाणि **'भवत्'** इति हलन्तशब्दानुसारं भवन्ति।

यथा उपर्युक्तवाक्येषु 'कीर्तिमत:' शब्दस्य प्रयोग: षष्ठ्यां विभक्त्यां कृत:।

**समुचितशब्दं** ( ✓) इति चिह्नेन चिह्नीकुरुत, प्रदत्तस्थाने च लिखत —

i. मधुवान्/मधुमान् मधु खादति। ..........................................

ii. बलवन्तं/बलमन्तं जनं पश्य। ..........................................



Rationalised 2023-24

iii. विद्यामान्/विद्यावान् जगति शोभते। ..........................................

iv. रूपवता/रूपमता स्वरूपस्य गर्व: न करणीय:।..........................................

v. कीर्तिमता/कीर्तिवता कविकालिदासेन अभिज्ञानशाकुन्तलं नाम नाटकं रचितम्। ......
..................................................

### णिनि (इनि)

देश की बहुत सी भाषाओं में णिनि प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

**युक्तताया: अर्थे एव इनि (इन्) प्रत्ययस्य योग: क्रियते।**

यथा — रथेन युक्त:- रथी (रथिन्)
बलेन युक्त: - बली (बलिन्)
धनेन युक्त: - धनी (धनिन्)
गुणेन युक्त: - गुणी (गुणिन्)

एतेषां प्रयोग: अपि वाक्येषु शब्दरूपनिर्माणाय क्रियते।

**विशेषण- विशेष्यपदानि योजयत —**

| | | | |
|---|---|---|---|
| धनिना | राजानम् | ...................... | ...................... |
| गुणिने | राज्ञि | ...................... | ...................... |
| रथिनम् | पुरुषेण | ...................... | ...................... |
| बलिनि | शासकम् | ...................... | ...................... |
| दण्डिनम् | नृपाय | ...................... | ...................... |

### तरप्-तमप् (तर-तम)

देश की बहुत सी भाषाओं में तरप्-तमप् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

| | | |
|---|---|---|
| लघु: | लघुतर: | लघुतम: |
| प्रशस्य: | प्रशस्यतर: | प्रशस्यतम: |
| कुशल: | कुशलतर: | कुशलतम: |

एभि: उदाहरणै: स्पष्टं भवति यत् तुलनायां तरप्-तमप्प्रत्ययस्य प्रयोग: भवति। यदा द्वयो: मध्ये तुलना क्रियते तदा तरप्प्रत्ययस्य, यदा च अधिकै: सह तुलना तदा तमप्प्रत्ययस्य प्रयोग: भवति।



© NCERT not to be republished

**1. अधोलिखितवाक्येषु समुचितपदेन रिक्तस्थानपूर्तिं कुरुत —**

i. अविनाशः स्वकार्ये ........................................ । (पटुः/पटुतरः/पटुतमः)

ii. सर्वेषु छात्रेषु प्रमोदः ........................................ । (कुशलः/कुशलतरः/कुशलतमः)

iii. फलेषु आम्रफलम् ........................................ । (मधुरम्/मधुरतम्/मधुरतमम्)

iv. अश्वगर्दभयोः मध्ये अश्वः ........................................ । (तीव्रः/तीव्रतरः/तीव्रतमः)

v. गीतासुशीलयोः मध्ये गीता ........................................ । (कुशला/कुशलतरा/कुशलतमा)

vi. वृक्षेषु देवदारुवृक्षः ........................................ । (उच्चः/उच्चतरः/उच्चतमः)

**मयट् प्रत्ययः (मय)**

देश की बहुत सी भाषाओं में मयट् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

- प्रचुरतायाः अर्थे मयट् (मय) प्रत्ययस्य प्रयोगः भवति।
- वस्तुवाचकशब्दैः (खाद्यवस्तूनि विहाय) विकारार्थेऽपि मयट् प्रत्ययस्य प्रयोगः भवति।

यथा — स्वर्णमयः, तेजोमयः, मृण्मयः इत्यादि।

**1. मयट्प्रत्यययुक्तानि पदानि आदाय प्रकृति-प्रत्यय-विभागं कुरुत —**

i. सौन्दर्यमयी कलिका उद्याने शोभते। ........................................ ........................................

ii. स्वर्णमयम् आभूषणं बहुमूल्यं भवति। ........................................ ........................................

iii. तुला लौहमयी भवति। ........................................ ........................................

iv. शान्तिमयं जीवनमेव श्रेयस्करम्। ........................................ ........................................

v. आनन्दमयं सुखमयम् च विद्यार्थिजीवनम्। ........................................ ........................................

**स्त्री-प्रत्ययाः**

(देश की बहुत सी भाषाओं में स्त्री-प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।)

पुल्लिङ्गशब्देभ्यः स्त्रीलिङ्गपदनिर्माणाय ये प्रत्ययाः प्रयुज्यन्ते ते स्त्रीप्रत्ययाः इति कथ्यन्ते। प्रमुखाः स्त्रीप्रत्ययाः सन्ति —

**(क) टाप्, डाप्, चाप् (एषु 'आ' अवशिष्यते।)**

**(ख) ङीप्, ङीष्, ङीन् (एषु 'ई' अवशिष्यते।)**



© NCERT not to be republished

(क) यथा–

| | | | | | |
|---|---|---|---|---|---|
| अज | - | अजा | बालक | - | बालिका |
| बाल | - | बाला | सेवक | - | सेविका |
| सरल | - | सरला | नायक | - | नायिका |
| कृष्ण | - | कृष्णा | मूषक | - | मूषिका |

(ख) यथा–

| | | | | | |
|---|---|---|---|---|---|
| गोप | - | गोपी | मृदु | - | मृद्वी |
| देव | - | देवी | पटु | - | पट्वी |
| नद | - | नदी | साधु | - | साध्वी |
| व्याघ्र | - | व्याघ्री | गुरु | - | गुर्वी |

## अभ्यासः

**1. प्रदत्तवाक्येषु लिङ्गपरिवर्तनं कृत्वा वाक्यानि पुनः लिखत-**

**यथा- एकः बालः जलं पातुम् इच्छति। एका बालिका जलं पातुम् इच्छति।**

i. सः सेविकाम् आकारयति। ..............................

ii. अस्य नाटकस्य नायकः कः अस्ति? ..............................

iii. आचार्यः स्नेहेन पाठयति। ..............................

iv. चतुरा बालिका सम्माननीया। ..............................

v. श्रीमान् कुत्र गच्छति? ..............................

vi. सभायाम् अनेके विद्वांसः आगच्छन्। ..............................


vii. बुद्धिमान् बालः पुरस्कारं लभते। ..............................

viii. गतवती महिला किम् उक्तवती? ..............................

© NCERT not to be republished

# 9

# समासाः



(अध्यापक: कक्षायां प्रविशति। छात्रा: उत्थाय अभिवादनं कुर्वन्ति।

अध्यापक: – (एकं छात्रम् उद्दिश्य) पङ्कज! किमर्थं खिन्न: इव दृश्यसे?

पङ्कज: – गुरुवर! एष शुभङ्कर: माम् सर्वदा 'पङ्के जात:' इति सम्बोधयति। न रोचते एतत् मह्यम्।

मनोज: – आम् गुरुवर! एष: माम् अपि 'मनसि जायते' इति उपहसति।

यशोदा – परम् यदा एष: माम् 'यश: ददाति या' इति कथयति तदा अहं तु प्रसन्ना भवामि।

घनश्याम: – माम् अपि एष: 'घन इव श्याम:' इति कथयति।

सुरेश: – माम् तु एष 'सुराणाम् ईश:' इति कथयति।

सर्वे छात्रा: – गुरुवर! कृपया एनम् अवबोधयतु येन स: एवं मा व्यवहरेत्।

अध्यापक: – (विहस्य) शुभङ्कर! किं त्वम् आत्मन: नाम अपि 'शुभं करोति' इति एवम् उच्चारयसि?

(सर्वे छात्रा: उच्चै: हसन्ति।)

अध्यापक: – भो छात्रा:! भवताम् नाम्नां कृते शुभङ्कर: यानि कानि अपि पदानि प्रयोजयति तानि न कथमपि अनुचितानि। वस्तुत: स: युष्माकं नाम्नां विग्रहम् एव प्रयोजयति।

© NCERT not to be republished

छात्रा: – कृपया विस्तरेण बोधयन्तु।

अध्यापक: – बाढम्। ध्यानेन एतत् कथनं शृणुत- एकदा नीले अक्षिणी यस्या:, सा माता च पिता च, तौ प्रणम्य, लम्बम् उदरम् यस्य तम्, घन इव श्यामम्, पार्वती च परमेश्वर: च, तौ प्रणतवती, गृहस्य उद्याने विशाल: च एष: वृक्ष:, तत्र आरूढम् एकं वानरम् अपश्यत्।

छात्रा: – गुरुवर! भवत: कथनम् अवगन्तुम् अक्षमा: वयम्।

अध्यापक: – अधुना पुन: शृणुत- एकदा नीलाक्षी पितरौ प्रणम्य लम्बोदरं घनश्यामं पार्वतीपरमेश्वरौ च प्रणतवती। तत: गृहोद्याने विशालवृक्षारूढम् एकं वानरम् अपश्यत्।

प्रथमं मया यानि पदानि प्रयुक्तानि तानि विग्रहवाक्यानि आसन्। पुन: मया तत्स्थाने समस्तपदानि प्रयुक्तानि। एतद्विषयं विस्तरेण एवम् अवगच्छाम: - यदा अनेकपदानां स्थाने विभक्तिलोपं कृत्वा एकपदं प्रयुज्यते तदा तत् पदं समस्तपदं भवति। समासप्रक्रियायाम् अनेन भाषासौष्ठवं लाघवं च परिज्ञायते। कथितमस्ति - **'समसनं समास:।'**

समासस्य मुख्यत: चत्वार: भेदा: सन्ति - अव्ययीभाव:, तत्पुरुष:, द्वन्द्व:, बहुब्रीहिश्च। तत्पुरुषस्यौ अन्यौ द्वौ मुख्यभेदौ अपि स्त: - कर्मधारयंद्विगुश्च। एतदतिरिक्तम् अलुक्, नञ्, उपपदतत्पुरुष: च अस्य भेदा: भवन्ति।

अस्मिन् अध्याये वयम् केवलं तत्पुरुष-द्विगु-द्वन्द्व-समासानां विशिष्टम् अभ्यासं करिष्याम:।

### तत्पुरुष: समास:
### (उत्तरपदप्रधान: तत्पुरुष:)

अस्मिन् समासे उत्तरपदं प्रधानं भवति। विग्रहे पूर्वपदेन सह विभक्तिप्रयोग: भवति। विग्रहे या विभक्ति: प्रयुज्यते तया नाम्ना एवास्य तत्पुरुष-समासस्य नाम भवति।

यथा —

| **समस्तपदानि** | **विग्रह:** | **समासनाम** |
|---|---|---|
| शरणागत: | शरणम् आगत: | द्वितीय-तत्पुरुष: |
| हरित्रात: | हरिणा त्रात: | तृतीया-तत्पुरुष: |
| पाकशाला | पाकाय शाला | चतुर्थी-तत्पुरुष: |
| रोगमुक्त: | रोगात् मुक्त: | पञ्चमी-तत्पुरुष: |
| राजपुरुष: | राज्ञ: पुरुष: | षष्ठी-तत्पुरुष: |
| जलमग्न: | जले मग्न: | सप्तमी-तत्पुरुष: |
| युधिष्ठिर: | युधि स्थिर: | अलुक्-तत्पुरुष: |

© NCERT not to be republished

| | | |
|---|---|---|
| कुम्भकारः | कुम्भं करोति इति | उपपद-तत्पुरुषः |
| अज्ञानम् | न ज्ञानम् इति | नञ्-तत्पुरुषः |

- नञ्-तत्पुरुषे यदि पदस्य प्रथमवर्णः स्वरः भवति तदा समस्तपदे 'न' स्थाने 'अन्' प्रयुज्यते परं यदि शब्दस्य प्रथमवर्णो व्यञ्जनं भवति तदा 'न' स्थाने 'अ' प्रयुज्यते।

## द्विगुः समासः
## (संख्यापूर्वो द्विगुः)

यस्मिन् समासे प्रथमपदं संख्यावाचि भवति समाहारस्य (एकत्रीकरणस्य) च भावः अस्ति सः द्विगुसमासः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहारः |
| चतुर्युगम् | चतुर्णां युगानां समाहारः |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |
| अष्टाध्यायी | अष्टानाम् अध्यायानां समाहारः |

## द्वन्द्व-समासः
## (उभयपदार्थप्रधानो द्वन्द्वः)

द्वन्द्वसमासे उभयोः पदयोः प्रधानता भवति। विग्रहे प्रतिपदं पश्चात् 'च' इति पदस्य प्रयोगः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| रामकृष्णौ | रामः च कृष्णः च |
| पितरौ/मातापितरौ | माता च पिता च |
| कन्दमूलफलानि | कन्दं च मूलं च फलं च |
| पाणिपादम् | पाणी च पादौ च |

## अभ्यासः

**1. प्रदत्तपदानां विग्रहं कृत्वा समासनाम लिखत —**

| **समस्तपदम्** | **विग्रहः** | **नाम** |
|---|---|---|
| **विद्यालयः** | **विद्यायाः आलयः** | **तत्पुरुषः** |
| i. सप्तर्षिः | ................................ | ................................ |
| ii. खलसज्जनौ | ................................ | ................................ |



© NCERT not to be republished

| | | |
|---|---|---|
| iii. गृहोद्याने | .................................... | .................................... |
| iv. विभवहीना: | .................................... | .................................... |
| v. चतुर्भुजम् | .................................... | .................................... |
| vi. पत्रपुष्पे | .................................... | .................................... |
